# उच्चतरविद्यालयानां कृते

## HIGHER SECONDARY COURSE

# ऐच्छिकम् - साहित्यम्

## OPTIONAL SAHITYA

### कक्ष्या - १२

### Standard - XII

Government of Kerala
DEPARTMENT OF EDUCATION

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING (SCERT); KERALA
2015

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्य विधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छल जलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे,
भारत भाग्य विधाता।
जय हे, जय हे, जय हे,
जय जय जय, जय हे ।

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

***Prepared by:***

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram - 695012, Kerala.
Website : www.scertkerala.gov.in e-mail : scertkerala@gmail.com
Phone : 0471 2341883, Fax 0471 2341869

Type setting and Layout : SCERT
Department of Education, Government of Kerala

*To be printed in quality paper - 80gsm maplitho (snow-white)*

# प्रास्ताविकम्।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा एकादश वर्गस्य कृते विरचितं संस्कृतसाहित्यं पाठपुस्तकं 2014-15 तमे वर्षे प्रवृत्तिपथमानीतम्। तस्यानुस्यूततया द्वादशवर्गस्य कृते आयोजितं साहित्यं पाठपुस्कतमिदम्। राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा निर्दिष्टां पाठ्यपद्धतीमनुसृत्य राज्यस्तरीयं साहचर्यं च परिचिन्त्य एव पाठभागाः निर्द्धारिताः।

आशीर्वादः, विवेकिता, स्वतन्त्रता, रमणीयता इत्याख्यैः चतुर्भिः एककैः युक्ते अस्मिन् पाठपुस्तके काव्यं, चम्पूकाव्यं, नाटकं, कथा,उपन्यासः, गीतकं, महाकाव्यांशं, आख्यायिका, काव्यशास्त्रम् इत्यादीनि, अन्तर्भावितानि। पाठ्यांशानां सम्यगवबोधनार्थम्आवश्यकं लघुव्याख्यानमपि दत्तम्। पठनप्रवर्तनानि प्रत्येकं पाठभागस्यान्ते दत्तानि। इतोऽप्यधिकतरं प्रवर्तनम् आयोजयितुम् अध्यापकाः समर्थाः भवेयुः।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा समायोजितायां कर्मशालायामेव पुस्तकस्यास्य सङ्कलनं कृतम्, यत्र तत्तद्विषये प्रवीणाः महाविद्यालयीयाध्यापकाः शिक्षाशास्त्रज्ञाश्च सन्निहिता अभवन्। पुस्तकस्यास्य उपयोगितासंवर्धनानुगुणं निर्देशाधिकम् अध्यापकैः यदि सूच्येत तर्हि भविष्यत्काले तस्योपयोगः क्रियेत। पाठपुस्तकमिदमुद्दिष्टं कार्यं निर्वोढुं प्रभवेदीति प्रतीक्षे।

**डा. एस्. रवीन्द्रन् नायर्**
निर्देशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षण
परिषद्, केरलाः

## TEXTBOOK DEVELOPMENT COMMITTEE

1. **Anandakumari P. N.,** HSSTSanskrit, BSSHSS, Kollangode, Palakkad
2. **Devi Prasad A.,** HSSTSanskrit, IJMHSS, Kottiyoor, Kannur
3. **Dr. Abhilash J.,** HSSTSanskrit, MKMHSS, Piravam, Ernakulam
4. **Madhu N.,** HSSTSanskrit, KVSHSS, Muthukulam, Alappuzha
5. **Rajendra Prasad,** Rtd. HSSTSanskrit, Ernakulam
6. **Ramachandran N. K.,** Rtd. DEO, Wayanad
7. **Sajikumar A. V.,** HSSTSanskrit, GHSS, Karupadanna, Thrissur
8. **Sankaranarayanan A.,** HSSTSanskrit, GSHSS, Tripunithura
9. **Sreedevi P. R.,** HSSTSanskrit, Mulamana HSS, Anakudi, TVPM
10. **Sreejith P.,** HSSTSanskrit, Nochat HSS, Nochad, Kozhikode

## EXPERTS

1. **Prof. V. Madhavan Pillai,** Rtd. Asso.Prof.Sanskrit, G.Womens College, TVPM
2. **Dr. G. Sahadevan,** Rtd. Asso. Prof. University College, TVPM
3. **Dr. C.K.Jayanthi,** Asso. Prof. Dept.of Sahithya,SSU of Saskrit

## GRAPHICS & LAYOUT

1. **Sreeraj V. P.,** Ernakulam

## ILLUSTRATION

1. **Varghese Kalathil,** Kannur
2. **Rajeevan Parayil,** Kannur

## ACADEMIC CO-ORDINATOR

1. **Dr. Shameeja,** Research Officer, SCERT, TVPM

# विषयानुक्रमणिका ।


| | पाठस्य नाम | व्यवहारः | पुटसंख्या |
|---|---|---|---|
| **एककम् - I** | **आशीर्वादः ।** | | |
| (१) | विचित्ररूपोऽनुग्रहः । | काव्यम् | ११ |
| (२) | सन्तानगोपालम् । | चम्पूकाव्यम् | २५ |
| (३) | बृहत्त्रयी । | उपन्यासः | ४१ |
| **एककम् - II** | **विवेकिता ।** | | |
| (१) | ज्ञानोदयः । | कथा | ५५ |
| (२) | मृच्छकटिकम् । | नाटकम् | ५९ |
| **एककम् - III** | **स्वतन्त्रता ।** | | |
| (१) | महितामृतम् । | महाकाव्यम् | ७७ |
| (२) | शक्तिं देहि । | गीतकम् | ९१ |
| **एककम् - IV** | **रमणीयता ।** | | |
| (१) | दानमेव महीयते । | महाकाव्यम् | १११ |
| (२) | प्रथमसमागमः । | आख्यायिका | १३३ |
| (३) | काव्यतत्वचिन्ता । | काव्यशास्त्रम् | १४१ |

# एककम्-१



# आशीर्वादः

# एककम्-१

# आशीर्वादः।

सुमनसां महतामाशीर्वादेन तथा देवताप्रसादेन च ऐश्वर्योपलब्धिः दुःखोपशान्तिपूर्व सुखानुभूतिः तथा वागुपासनया तत्कटाक्षैः महाकवित्वासिद्धिश्च इत्यादि लोके सम्दृश्यन्ते। तत्त्वमिदं ख्यापयितुं समर्थानि त्रीणि पाठभागानि एककेऽस्मिन् आयोजितानि।

कुचेलं प्रति कृष्णस्य मनसि या अनुकूला भावना संजाता सा एव कुचेलस्य श्रेयसः निदानम्। आतिथ्यस्य मित्रतायाः च उत्तमनिदर्शनरूपेण कृष्णकुचेलयोः पुनस्समागमः अत्रोपवर्ण्यते।

अश्वतितिरुनाल् महोदयेन रचितात् सन्तानगोपालकचम्पूकाव्यादुद्धृते द्वितीयपाठे वैकुण्ठनाथस्याशीर्वादेन अर्जुनस्य अहङ्कारनिर्मुक्तिः तथा विनष्टपुत्रस्य वृद्धब्राह्मणस्य पुत्रप्राप्तिश्च प्रतिपाद्यते। एवमेव पञ्चमहाकविषु प्रथितानां माघभारविश्रीहर्षाणां महाकाव्यानां तेषां वागादिरसवैचित्र्यपरतां प्रकाशयति बृहत्त्रयी नामके तृतीये पाठे।



## पठनाधिगमः

- स्तोत्रकाव्यान्यधिकृत्य लघुटिप्पणीं लिखति।
- मेल्पुत्तूर् नारायणभट्टपादस्य जीवनचरितमधिकृत्य लघुटिप्पणीं लिखति।
- श्लोकं सतालमालापति।
- गद्यक्रमं लिखति।
- नूतनपदानि शब्दकोशे निवेशयति।
- संस्कृतवाक्यानि प्रादेशिकभाषायां विवर्तयति।
- पदविश्लेषणं करोति।
- आस्वादनटीकां लिखति।
- चम्पूकाव्यं कर्तारं च अधिकृत्य लघुटिप्पणीं लिखति।
- गद्यं वाचयति।
- महाकाव्यं कर्तारं च अधिकृत्य वदति।

# १.१ विचित्ररूपोऽनुग्रहः





## प्रवेशकः

नारायणभट्टपादाः केरलीयः संस्कृतकविः प्रथितः वैयाकरणश्च। तस्य जन्म तु मलप्पुरं जिल्लायाम् मेल्पुत्तुर्नामके गृहे अभवत्। नारायणीयम्, प्रक्रियासर्वस्वम्, मानमेयोदयस्य मानभागः पुनः अनेके प्रबन्धाश्च तेन विरचिताः। गुरुपवनपुरेशस्य पुरतः विष्णोः चरितं निर्वर्ण्य लिखितं काव्यं भवति श्रीमन्नारायणीयम् । तत्र सप्ताशीतितमदशके वर्तमानं कुचेलोपाख्यानम् अत्र पाठरूपेण स्वीकृतम्।

[redacted]

**कुचेलनामा भवतः सतीर्थ्यतां**
**गतः स सान्दीपनिमन्दिरे द्विजः।**
**त्वदेकरागेण धनादिनिस्पृहो**
**दिनानि निन्ये प्रशमी गृहाश्रमी।।१।।**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| सान्दीपनिमन्दिरे | - | सान्दीपनिमहर्षेः आश्रमे |
| भवतः | - | तव (श्रीकृष्णस्य) |

| | | |
|---|---|---|
| सतीर्थ्यतां गतः | - | सब्रह्मचारितां गतः |
| प्रशमी | - | मनोनिग्रहसहितः (निगृहीतमनाः) |
| गृहाश्रमी | - | गृहस्थः |
| कुचेलनामा | - | कुचेल इति नामकः |
| स द्विजः | - | स ब्राह्मणः |
| त्वदेकरागेण | - | त्वयि केवलभक्त्या |
| धनादिनिस्पृहः | - | धनादिषु अनासक्तः |
| दिनानि निन्ये | - | दिवसाननयत्। |

**क्रिया** - निन्ये। 'णीञ्' प्रापणे आत्मनेपदि लिट् प्र.पु एकवचनम्।

**विग्रहः -**

| | | |
|---|---|---|
| प्रशमी | - | प्रशमं अस्य अस्ति इति प्रशमी। |
| गृहाश्रमी | - | गृहम् आश्रमं यस्य सः गृहाश्रमी। |
| द्विजः | - | द्विः जायन्ते इति द्विजः। |

**सारः**

पुरा सान्दीपनिमहर्षेः आश्रमे श्रीकृष्णेन सह सब्रह्मचारिरूपेण उषितः कुचेल इति ब्राह्मणः अधुना जितेन्द्रियः गृहस्थः त्वयि केवलभक्त्या धनादिषु अनासक्तः सन् दिवसाननयत्।

[redacted]

**समानशीलापि तदीयवल्लभा**
**तथैव नो चित्तजयं समेयुषी।**
**कदाचिदूचे बत वृत्तिलब्धये**
**रमापतिः किं न सखा निषेव्यते।।२।।**

**पदच्छेदः**

तथैव - तथा + एव।

कदाचिदूचे - कदाचित् +ऊचे।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| समानशीलापि | - | तुल्यशीला अपि |
| तदीयवल्लभा | - | कुचेलस्य भार्या |
| तथा एव | - | कुचेलसदृशम् एव |
| चित्तजयं | - | मनोजयं |
| न समेयुषी | - | न प्राप्तवती |
| बत! | - | कष्टम्! |
| कदाचित् | - | एकदा |
| वृत्तिलब्धये | - | जीवनलब्धये |
| सखा रमापतिः | - | सुहृद् श्रीकृष्णः |
| किं न निषेव्यते | - | किं न सेव्यते |
| इति ऊचे | - | इत्येवं (भर्तारम्) उवाच। |

**क्रिया** - निषेव्यते - नि पूर्वक षिञ् (सेवने) आत्मनेपदि लट् प्र.पु ए

निषेव्यते निषेव्येत निषेव्यन्ते

- समेयुषी सम + इयिवस् (क्वसुप्रत्ययान्तः) स्त्री प्रथमा ए.व

**विग्रहः** - वृत्तेः लब्धिः वृत्तिलब्धिः, तस्यै वृत्तिलब्धये।

**सारः**

तुल्यशीला अपि कुचेलस्य भार्या मनोजयं न प्राप्तवती आसीत्। एकदा जीवनलब्धये श्रीकृष्णः किं न सेव्यते इति भर्तारम् अपृच्छत्।

**इतीरितोऽयं प्रियया क्षुधार्तया**
**जुगुप्समानोऽपि धने मदावहे।**
**तदा त्वदालोकनकौतुकाद्ययौ**
**वहन् पटान्ते पृथकानुपायनम्।।३।।**

कुचेलेन उपनीतम् उपायनं किमासीत्?

**पदच्छेदः**

| | | |
|---|---|---|
| इतीरितोऽयम् | - | इति + ईरितः + अयम्। |
| जुगुप्समानोऽपि | - | जुगुप्समानः + अपि। |
| त्वदालोकनकौतुकाद्ययौ | - | त्वदालोकनकौतुकात् + ययौ। |
| पृथकानुपायनम् | - | पृथकान् + उपायनम्। |
| **अन्वयः** | | **अर्थः** |
| क्षुधार्तया | - | बुभुक्षापीडितया |
| प्रियया | - | प्रियतमया (भार्यया) |
| इति ईरितः | - | इति उक्तः |
| अयं | - | अयं कुचेलः |
| मदावहे धने | - | अहङ्कारजनके सम्पत्तौ |
| जुगुप्समानः अपि | - | विरक्तः अपि (अनासक्तः) |
| तदा त्वदालोकनकौतुकात् | - | तदा त्वां द्रष्टुम् इच्छया |
| पटान्ते | - | वस्त्रान्ते |
| पृथुकान् | - | चिपिटकान् |
| उपायनं | - | उपहारं |
| वहन् ययौ। | - | गृहीत्वा अगच्छत्। |

**क्रियापदानि** - ययौ - या (प्रापणे) परस्मैपदि लिट् प्र.पु एकवचनम्।

**विग्रहः** - क्षुधार्तया - क्षुधाया आर्ता क्षुधार्ता, तया ।

मदावहे - मदम् आवहतीति मदावहः, तस्मिन्।

**सारः**

दारिद्र्यदुःखेन पीडितया प्रियतमया एवम् उक्तः कुचेलः सम्पत्तौ अनासक्तोऽपि कृष्णदर्शनेच्छया वस्त्रान्ते पृथुकान् उपहाररूपेण स्वीकृत्य द्वारकाम् अगच्छत्।

**गतोऽयमाश्चर्यमयीं भवत्पुरीं**
**गृहेषु शैब्याभवनं समेयिवान्।**
**प्रविश्य वैकुण्ठमिवाप निर्वृतिं**
**तवातिसंभावनया तु किं पुनः।।४।।**




**पदच्छेदः**

गतोऽयमाश्चर्यमयीम् - गतः +अयम् + आश्चर्यमयीम्।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अयं | - | अयं कुचेलः |
| आश्चर्यमयीं | - | अद्भुतावहां |
| भवत्पुरीं गतः | - | भवतः प्रासादं गतः |
| गृहेषु | - | अनेकेषु भवनेषु |
| शैब्याभवनं | - | शैब्यायाः (मित्रबिन्दायाः) प्रासादम् |
| समेयिवान् | - | प्राप्तवान् |
| वैकुण्ठं प्रविश्य इव | - | वैकुण्ठलोकं प्राप्य इव |
| निर्वृतिम् आप | - | सन्तोषं प्राप |
| तव अतिसंभावनया तु | - | तव अतिथिसत्कारेण तु |
| पुनः किम्? | - | पुनः कीदृशं सन्तोषं प्राप्तवान् (अधिकतरं सन्तोषं प्राप्तवान् इति भावः) |

समेयिवान् - सम् + इण् गतौ क्वसुप्रत्ययान्तः।

प्रविश्य- प्रपूर्वक विश् धातोः ल्यबन्तम्।

**क्रिया** आप - आप्लृ (व्याप्तौ) परस्मैपदि लिट् प्रथमपुरुष एकवचनम्।

आप आपतुः आपुः।

**सारः-**

कुचेलः आश्चर्यजनकां द्वारकां प्राप। अनन्तरं भगवतः हर्म्येषु शैब्यायाः गृहम् आगत्य स कुचेलः वैकुण्ठलोकं प्राप्त इव निर्वृतिम् अनुभूतवान्। भगवतो अतिथिसत्कारेण तु पुनः अत्यधिकां निर्वृतिं प्राप्तवान्।

**प्रपूजितं तं प्रियया च वीजितं**
**करे गृहीत्वाऽकथयः पुरा कृतम्।**
**यदिन्धनार्थं गुरुदारचोदितै-**
**रपर्तुवर्षं तदमर्षि कानने।। ५।।**

[redacted]

**पदच्छेदः**

यदिन्धनार्थम्- यद् + इन्धनार्थम्।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| प्रपूजितं | - | सम्यक् पूजितम् |
| प्रियया वीजितं च तं | - | कृष्णप्रियया वीजितं च तं कुचेलम् |
| करे गृहीत्वा | - | हस्ते गृहीत्वा |
| गुरुदारचोदितैः | - | गुरुपत्नीप्रेरितैः |
| इन्धनार्थं कानने | - | इन्धनानयनार्थं वने |
| अपर्तुवर्षम् | - | अकालोत्पन्नं वर्षम् |
| अमर्षि | - | असह्यगत |
| यत् पुरा कृतम् | - | यत् बाल्यकाले सम्भूतं |
| तत् (त्वम्) अकथयः | - | तद् (त्वम्) अवदः। |

**क्रिया** - अमर्षि- मृषु सहने कर्मणि लुङ् आत्मनेपदि प्रथमपुरुष एकवचनम्।
अकथयः- कथ (कथने) परस्मैपदि लङ् मध्यमपुरुष एकवचनम्।

**विग्रहः** - भवत्पुरीं- भवतः पुरी भवत्पुरी, ताम्।

**सारः**

अतिथिसत्कारेण पूजितं कुचेलं शैब्यादेवी सम्यक् वीजितवती। तं कुचेलं हस्ते गृहीत्वा सः कृष्णः पुरा गुरुपत्नीप्रेरणया कानने इन्धनानयनार्थं गत्वा तदा उत्पन्नस्य वर्षस्य सहनम् इत्यादयः बाल्यकाले सम्भूतम् उक्तवान्।

**त्रपाजुषोऽस्मात् पृथुकं बलादथ**
**प्रगृह्य मुष्टौ सकृदाशिते त्वया।**
**कृतं कृतं नन्वियतेति सम्भ्रमात्**
**रमा किलोपेत्य करं रुरोध ते।।६।।**

**पदच्छेदः**

| | | |
|---|---|---|
| त्रपाजुषोऽस्मात् | - | त्रपाजुषः +अस्मात् |
| बलादथ | - | बलात् + अथ |
| सकृदाशिते | - | सकृत् +आशिते |
| नन्वियतेति | - | ननु +इयता +इति |
| किलोपेत्य | - | किल + उपेत्य |

का कृष्णस्य करं रुरोध ?

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अथ | - | अनन्तरं |
| त्रपाजुषः | - | लज्जासहितात् |
| अस्मात् | - | कुचेलात् |
| त्वया | - | भवता (कृष्णेन। |
| बलात् | - | बलात्कारेण |
| पृथुकं प्रगृह्य | - | चिपिटकं प्रगृह्य |
| मुष्टौ सकृत् आशिते | - | एकमुष्टिपरिमितं भक्षिते सति |
| ननु इयता कृतं कृतम् इति | - | एतावता पर्याप्तम् इति |
| सम्भ्रमात् उपेत्य | - | सम्भ्रमेण आगत्य |
| रमा | - | लक्ष्मीदेवी |
| ते करं रुरोध | - | तव हस्तं रुद्धवती |
| किल! | - | किं खलु!। |

**क्रिया** - रुरोध- रुधिर् आवरणे परस्मैपदि लिट् प्रथमपुरुष एकवचनम्।
प्रगृह्य- प्र पूर्वक गृह् धातोः ल्यबन्तमव्ययम्।
उपेत्य- उप पूर्वक इण् धातोः ल्यबन्तमव्ययम्।

**सारः**

अनन्तरं लज्जासहितात् कुचेलात् बलात्कारेण पृथुकं प्रगृह्य कृष्णेन भक्षिते सति एतावता पर्याप्तम् इति सम्भ्रमेण रुग्मिणी कृष्णहस्तं रुद्धवती।

**भक्तेषु भक्तेन स मानितस्त्वया**
**पुरीं वसन्नेकनिशां महासुखम्।**
**बतापरेद्युर्द्रविणं विना ययौ**
**विचित्ररूपस्तव खल्वनुग्रहः।।७।।**

भगवदनुग्रहः कीदृशः ?

**पदच्छेदः**

| | | |
|---|---|---|
| मानितस्त्वया | - | मानितः+ त्वया। |
| वसन्नेकनिशाम् | - | वसन् + एकनिशाम्। |
| बतापरेद्युर्द्रविणम् | - | बत +अपरेद्युः+ द्रविणम्। |
| विचित्ररूपस्तव | - | विचित्ररूपः + तव। |
| खल्वनुग्रहः | - | खलु + अनुग्रहः। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| भक्तेषु | - | भक्तजनेषु |
| भक्तेन | - | स्निग्धेन |
| त्वया | - | भवता (श्रीकृष्णेन) |
| मानितः सः | - | बहुमानितः कुचेलः |
| एकां निशां | - | एकां रात्रिम् |
| पुरीम् | - | कृष्णप्रासादे (द्वारकापुरीं) |
| महासुखं वसन् | - | ससुखम् निवसन् |
| बत अपरेद्युः | - | हा अपरस्मिन् दिने |
| द्रविणं विना | - | धनं विना |
| ययौ | - | अगच्छत् |

| | | |
|---|---|---|
| तव अनुग्रहः | - | तव आशीर्वादः |
| विचित्ररूपः खलु | - | विलक्षणः खलु (भिन्नः खलु) |

**व्याकरणविशेषः** - महत् सुखं महासुखम् इत्यत्र 'आन्महतः समानाधिकरणजातीययोः' इति सूत्रेण 'महत्' शब्दस्य आत्वम्।

**सारः**

भक्तप्रियेण कृष्णेन मानितः सः कुचेलः एकां रात्रिं द्वारकापुरीं ससुखं उषित्वा अनन्तरदिने धनं विनापि गृहं प्रति अगच्छत्। भगवतः अनुग्रहः विचित्ररूपः खलु।

भगवदनुग्रहः कीदृशः ?

**यदि ह्ययाचिष्यमदास्यदच्युतो**
**वदामि भार्यां किमिति व्रजन्नसौ।**
**त्वदुक्तिलीलास्मितमग्नधीः पुनः**
**क्रमादपश्यन्मणिदीप्रमालयम्।।८।।**

**पदच्छेदः**

| | | |
|---|---|---|
| ह्ययाचिष्यमदास्यदच्युतो- | | हि +अयाचिष्यम्+ अदास्यत् + अच्युतः। |
| वसन्नसौ | - | वसन् + असौ। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| यदि अयाचिष्यम् | - | अयाचं चेत् |
| अच्युतः | - | श्रीकृष्णः |
| अदास्यत् हि | - | नूनमेव अददात् |
| भार्यां किं वदामि | - | पत्नीं किं वदिष्यामि |
| इति व्रजन् | - | इति चिन्तयित्वा गच्छन् |

| | | |
|---|---|---|
| असौ | - | असौ कुचेलः |
| त्वदुक्तिलीलास्मितमग्नधीः | - | तव सम्भाषणे लीलायां मन्दहासे च मग्नबुद्धिः सन् |
| पुनः क्रमात् | - | पुनः क्रमेण |
| मणिदीप्रमालयम् | - | रत्नशोभितं गृहं |
| अपश्यत् | - | दृष्टवान्। |

**क्रियापदानि**

अयाचयिष्यम् - याचृ- याचने परस्मैपदि लृङ् उत्तमपुरुष एकवचनम्।

अदास्यत् - दा दाने परस्मैपदि लृट् प्रथमपुरुष एकवचनम्।

अदास्यत् अदास्यताम् अदास्यन्।

**सारः**

यदि अयाचत् चेत् कृष्णः नूनमेव अददात् , पुनः पत्नीं किं वदिष्यामि इत्यादि चिन्तया सह श्रीकृष्णसम्भाषणे लीलायां मदुहासे च मग्नबुद्धिः कुचेलः क्रमेण रत्नशोभितं हर्म्यं अपश्यत्।

**किं मार्गविभ्रंश इति भ्रमन् क्षणं**
**गृहं प्रविष्टः स ददर्श वल्लभाम्।**
**सखीपरीतां मणिहेमभूषिताम्**
**बुबोध च त्वत्करुणां महाद्भुताम्।।९।।**




**अन्वयः** | **अर्थः**

| | | |
|---|---|---|
| मार्गविभ्रंशः किम् | - | मार्गभ्रंशः किम्? |
| इति क्षणं भ्रमन् | - | इति क्षणकालं विभ्रमन् |
| सः गृहं प्रविष्टः | - | सः कुचेलः स्वगृहं प्रविष्टः |
| सखीपरीतां | - | सखीभिः परिसेवितां |
| मणिहेमभूषितां | - | रत्नैः सुवर्णैश्च चालङ्कृतां |

| | | |
|---|---|---|
| वल्लभां ददर्श | - | भार्याम् अपश्यत् |
| त्वत्करुणा | - | तव कारुण्यम् |
| महाद्भुतां | - | महाश्चर्यकरां |
| बुबोध च | - | ज्ञातवान् च। |

**सारः**

मार्गभ्रंशः संजातः किम्? इति क्षणं विस्मयाकुलः कुचेलः स्वगृहं प्रविश्य सखीभिः सेवितां भार्याम् अपश्यत्। हे भगवन्! भवतः अद्भुतं कारुण्यं च ज्ञातवान्।

**स रत्नशालासु वसन्नपि स्वयं**
**समुन्नमद्भक्तिभरोऽमृतं ययौ।**
**त्वमेवमापूरितभक्तवाञ्छितो**
**मरुत्पुराधीश हरस्व मे गदान्॥१०॥**

'अमृतं ययौ-' कथम्?

**पदच्छेदः**

समुन्नमद्भक्तिभरोऽमृतम् - समुन्नमद्भक्तिभरः + अमृतम्।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| मरुत्पुराधीश! | - | हे गुरुपवनपुरेश! |
| सः स्वयं | - | स कुचेलः स्वयं |
| रत्नशालासु | - | रत्नमयगृहेषु |
| वसन्नपि | - | जीवन्नपि |
| समुन्नमद्भक्तिभरः | - | वर्धितभक्तियुक्तः |
| अमृतं ययौ | - | मोक्षं ययौ |
| एवम् आपूरितभक्तवाञ्छितः | - | एवं भक्तानाम् अभिलाषपूरणे तत्परः |
| त्वम् | - | भगवान् (कृष्णः) |
| मे गदान् | - | मम पीडाः |
| हरस्व | - | दूरीकरोतु। |

**क्रियापदानि** - ददर्श- दृशिर् प्रेक्षणे परस्मैपदि लिट् प्र.पु.ए.व।

ददर्श ददर्शतुः ददर्शुः।

बुबोध- बुध अवबोधने परस्मैपदि लिट् प्र.पु.ए।

बुबोध बुबोधतुः बुबुधुः।

हरस्य हृञ् हरणे आत्मनेपदि- लोट् मध्यमपुरुष एकवचनम्।

**विग्रहः** - मरुत्पुराधीशः मरुत्पुरस्य अधीशः मरुत्पुराधीशः, तत्संबुद्धौ।

तव उक्तिः- त्वदुक्तिः, त्वदुक्तिरूपः लीलास्मितः तस्मिन् मग्ना धीः येन सः।

**सारः**

भोः! गुरुपवनपुरेश!, स कुचेलः रत्नमये गृहे वसन्नपि भवन्तं प्रति तस्य भक्तिः ववर्धे। वर्धितभक्तियुक्तः सः मोक्षं प्राप। एवं भक्तानाम् अभिलाषपूरणे समर्थः भवान् मम दुःखानि दूरीकरोतु।

अत्र सप्तमे नवमे च श्लोके इन्द्रवंशवंशस्थयोः सङ्कररूपम् उपजाति वृत्तम्। शिष्टेषु वंशस्थं वृत्तम्।



## पठनप्रवर्तनानि

१. काव्यं कक्ष्यायाम् आलपतु।

श्रद्धेयाः अंशाः।

- अक्षरव्यक्तिः।
- सतालालपनम्।
- अर्थबोधः।

२. नूतनपदचयनं कृत्वा शब्दकोशे निवेशयतु।


श्रद्धेयाः अंशाः।

- नूतनपदानां चयनम्।
- अर्थनिर्धारणम्।
- पदकोशनिवेशनम्।

३. सन्धिच्छेदं कृत्वा कोशे निवेशयतु।

श्रद्धेयाः अंशाः।

- सन्धियुक्तपदचयनम्।
- सन्धिविश्लेषणम्।
- सन्धिकृतपदकोशे निवेशनम्।



# १.२
# सन्तानगोपालम्



## प्रवेशकः

तिरुविताङ्कूर् देशस्य महाराजस्य कार्तिकतिरुनाल् महाभागस्य भागिनेयः आसीत् अश्वतितिरुनाल् महाभागः (१७५६-१७९४)। बाल्यादेव काव्यकरणे समर्थः अयं नरकासुरवधं नाम कथाकेलिपदं विरच्य स्वकाव्यकरणकौशलं प्रदर्शितवान्। पुनः अम्बरीषचरितम्, पूतनामोक्षम्, रुग्मिणीस्वयंवरम् पौण्ड्रकवधम् च कथाकेलिपदरूपेण विरचितम्। पुनः वञ्चीशस्तवम्, कार्तवीर्यविजयम्, सन्तानगोपालम् इति त्रयः चम्पूप्रबन्धाः च विरचिताः। रुग्मिणीपरिणयं नाटकं, दशावतारं भाणं च अस्यैवेति प्रथा।

अनासक्तिमार्गे स्थित्वा निरंहकारी कुचेलः श्रेयः प्रेयश्च अवाप। अहङ्कारयुक्तः अर्जुनः तु स्वयं नाशाभिमुखं गच्छतीति ज्ञात्वा कृष्णः तस्य अहंकारस्य उन्मूलनाशं कर्तुम् उद्यतः । पुनः अर्जुनः निर्मलमानसः सन् जीवितविजयं प्राप्नोति। तदेव सन्तानगोपालनामकस्य चम्पूकाव्यस्य सारः।

**विहितभुवनभद्रे वासुभद्रे धरित्री-**
**भरहरणविनिद्रे भूरिकारुण्यसान्द्रे।**
**न परमखिललोकाः द्वारवत्यां जगत्या-**
**मुदधिवलयवत्यां हृष्टपुष्टाः बभूवुः।।१।।**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| धरित्रीभरहरणविनिद्रे | - | भूमिभारहरणाय जागरिते |
| भूरिकारुण्यसान्द्रे | - | कारुण्याधिक्यसहिते |
| वासुभद्रे | - | वासुदेवे (कृष्णे) |
| विहितभुवनभद्रे (सति) | - | प्रदत्तलोकैश्वर्ये |
| उदधिवलयवत्यां | - | समुद्रसमावृतायां |
| जगत्यां | - | भूम्यां |
| द्वारवत्यां | - | द्वारकायां |
| अखिललोकाः | - | अखिलजनाः |
| हृष्टपुष्टाः | - | सन्तुष्टाः वर्धितवीर्याः च |
| बभूवुः | - | अभूवन्। |

**सारः-** भगवान् श्रीकृष्णः भूमिपालने श्रद्धालुः कारुण्यवान् लोकाय ऐश्वर्यं दत्त्वा द्वारकां बभार। तदा अखिलाः जनाः सन्तुष्टाः वीर्यवन्तः चासन्। धरित्रीभरहरणविनिद्रे भूरिकारुण्यभद्रे वासुभद्रे विहितभुवनभद्रे इत्यादिषु सतिसप्तमीप्रयोगः।

**एवं ससुखमेधमानेषु सकलवृष्ण्यन्धकेषु द्वारवत्यां तु कस्यचित् द्विजन्मनः अपत्याष्टकं जातमात्रनष्टमजनिष्ट।**

एवमेव -एवं प्रकारेण, ससुखमेधमानेषु- ससुखं वर्धमानेषु, सकलवृष्ण्यन्धकेषु- सर्वेषु वृष्ण्यन्धकवंशप्रमुखेषु, द्वारवत्यां तु- द्वारकायां एव,

कस्यचित् द्विजन्मनः- कस्यचन ब्राह्मणस्य, अपत्याष्टकं- अष्टपुत्राः, जातमात्रनष्टं- जननमात्रेणैव नष्टं, अजनिष्ट- अभवत्।ससुखम्- सुखेन सह वर्तते इति।

**राजद्वारि मृतं निधाय तनयं क्वास्ते निरस्तत्रपः**
**कृष्णः स्त्रीजनलम्पट! क्व नु हली हालामदान्धाशयः।**
**इत्युच्चैर्गिरमुद्गिरन् द्विजवरः क्षिप्रं प्रपेदे सभाम्**
**नीरन्ध्रान्धकवृष्णिवीरमकुटीरत्नाङ्कुरोद्यत्प्रभाम्।।**

**पदच्छेदः** - क्वास्ते- क्व +आस्ते।
इत्युच्चैर्गिरमुद्गिरन्- इति +उच्चैः +गिरम् +उद्गिरन्।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| राजद्वारि | - | हर्म्यस्य द्वारभागे |
| मृतं तनयं | - | गतायुषं पुत्रम् |
| निधाय | - | निक्षिप्य |
| निरस्तत्रपः | - | लज्जारहितः |
| स्त्रीजनलम्पटः | - | स्त्रीषु आसक्तः |
| कृष्णः | - | श्रीकृष्णः |
| क्वास्ते | - | कुत्र अस्ति |
| हालामदान्धाशयः | - | मद्यमदान्धः |
| हली | - | बलरामः |
| क्व नु | - | कुत्र? |
| इति उच्चैः | - | एवं सशब्दं |
| गिरमुद्गिरन् | - | वाक्यं वदन् |
| द्विजवरः | - | ब्राह्मणः |

| | | |
|---|---|---|
| नीरन्ध्रान्धकवृष्णिवीरमकुटी रत्नाङ्कुरोद्यत्प्रभाम् | - | निरन्तरसन्निहितान्धकवृष्णिवीराणां मकुटरत्नानां प्रभाभिः दीपिताम् |
| सभाम् | - | वेदिकाम् |
| क्षिप्रम् | - | झटिति |
| प्रपेदे | - | प्राप। |

**सारः-** ब्राह्मणः गतायुषं पुत्रं राजद्वारे संस्थाप्य 'लज्जारहितः स्त्रीलम्पटः कृष्णः कुत्रास्ति? मद्येन मदान्धः बलरामः कुत्र?' इति उच्चैराक्रोशन् प्रशोभमानां राजसभां प्राविशत्।

**अष्टौ नष्टास्तनूजाः कितव! तव दुराचारतश्चोरतश्चेत्**
**कष्टं भोः! कष्टमेतन्नवममपि मृतं बालमालोकयेति।**
**भूयो भूयो वचोभिश्श्रवणकटुतरैर्भर्त्सयन्तं द्विजन्तं**
**दृष्ट्वा देवस्तदानीमतनुत कुहनामानुषो मौनमुद्राम्।।**

**पदच्छेदः**

| | | |
|---|---|---|
| नष्टास्तनूजाः | - | नष्टाः +तनूजाः। |
| दुराचारतश्चोरतश्चेत | - | दुराचारतः +चोरतः+ चेत्। |
| कष्टमेतन्नवममपि | - | कष्टम् + एतत् +नवमम् +अपि |
| बालमालोकयेति | - | बालम् +आलोकय +इति |
| भूयो भूयो वचोभिः | - | भूयः+ भूयः+ वचोभिः |
| द्विजन्तम् | - | द्विजं + तम् |
| देवस्तदानीमतनुत | - | देवः + तदानीम् +अतनुत |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| (हे) कितव! | - | हे चोर! |
| तव दुराचारतः | - | तव दुष्प्रवृत्या |
| चोरतः च | - | तस्करवृत्या च |
| मम अष्टौ तनूजाः | - | मम अष्टपुत्राः |
| नष्टाः | - | विनष्टाः |
| भो कष्टं कष्टम् एतत् | - | भो कृष्ण! एतत् कष्टं |
| मृतं नवमं बालम् अपि | - | गतायुषं नवमं पुत्रमपि |
| आलोकय | - | पश्य |
| इति भूयः भूयः | - | एवं पुनः पुनः |
| श्रवणकटुतरैः वचोभिः | - | अतिरूक्षैः उक्तिभिः |
| भर्त्सयन्तं | - | अधिक्षिपन्तं |
| तं द्विजम् | - | तं विप्रं |
| दृष्ट्वा | - | संदृश्य |
| कुहनामानुषः | - | मायामनुष्यः |
| देवः | - | श्रीकृष्णः |
| तदानीं | - | तत्समये |
| मौनमुद्रामतनुत | - | मौनम् अभजत । |

**सारः**- 'हे चोर ! तव दुष्टवृत्या मम अष्टौ पुत्राः हताः। गतायुषं नवमं पुत्रमपि पश्य' इति कठोरवाग्भिः अधिक्षिपन्तं तं ब्राह्मणं दृष्ट्वा मायापुरुषः श्रीकृष्णः मौनमभजत।

**ततश्चैवमादीनि वचनानि मुहुर्मुहुर्लपन्तं बहु विलपन्तं करुणासागरे पतन्तं द्विजं तम् उपसान्त्वयन् परन्तपस्स कौन्तेयः शकुन्तराजनिकेतनप्रलम्बशासनप्रमुखेषु वृष्णिवीरेषु शृण्वत्सु**

**प्रकटितनिजगर्वगरिमधुरां मधुराम् गिरमभाषिष्ट।**

**पदच्छेदः**

ततश्चैवमादीनि -ततः +च+ एवम् + आदीनि
मुहुर्मुहुर्लपन्तं -मुहुः +मुहुः +लपन्तम्
परन्तपस्स - परन्तपः + सः

ततश्चैवमादीनि -अनन्तरं इत्यादीनि वचनानि -वाक्यानि मुहुर्मुहुर्लपन्तं - पुनः पुनः आलपन्तं बहुविलपन्तं - बहुप्रकारेण रुदन्तं, करुणासागरे पतन्तं- शोकसागरे निपतन्तं, द्विजं तं- ब्राह्मणं तं, उपसान्त्वयन्- परिसान्त्वयन्, परन्तपः सः- शत्रोः दुःखकारी सः, कौन्तेयः- कुन्तीपुत्रः अर्जुनः, शकुन्तराजनिकेतनप्रलम्बशासनप्रमुखेषु - गरुडवाहने कृष्णे प्रलम्बशासके बलरामे च, वृष्णिवीरेषु- वृष्णिवंशप्रमुखेषु, श्रुण्वत्सु- यदा ते अश्रृण्वन् तदा एव प्रकटितनिजगर्वगरिमधुराः- स्वगर्वस्य गुरुत्वं प्रकटयन्तीं, मधुरां - मनोहरां, गिरं- वाचम्, अभाषिष्ट- अभाषत। भाष् धातुः (व्यक्तायां वाचि) लुङ् आ.प्र.पु. एकवचनम्।

**नाहं शौरिर्न खलु मुसली नानिरुद्धो न साम्बो**
**न प्रद्युम्नो भुवनविदितः पाण्डवः फल्गुनोऽयम्।**
**व्यक्तं वक्ति स्मरहरशिरश्चण्डकोदण्डकाण्ड-**
**प्रौढाघातव्रणगणकिणग्रन्थि बाह्वोर्बलं मे।।**

**पदच्छेदः**

नाहं - न +अहं
शौरिर्न - शौरिः+ न
नानिरुद्धो न - न +अनिरुद्धः+ न
फल्गुनोऽयम् - फल्गुनः+ अयम्
बाह्वोर्बलम् - बाह्वोः +बलम्

| **अन्वयम्** | | **अर्थः** |
|---|---|---|
| अहं शौरिः न | - | अहं श्रीकृष्णः न |
| मुसली न खलु | - | निश्चयेन बलरामः न |
| न अनिरुद्धः | - | प्रद्युम्नपुत्रः अनिरुद्धः न |
| साम्बः न | - | कृष्णपुत्रः साम्बः न(कृष्णस्य जाम्बवत्यां जातः पुत्रः साम्बः) |
| प्रद्युम्नः न | - | कृष्णपुत्रः प्रद्युम्नः अपि न (कृष्णस्य रुग्मिण्यां जातः पुत्रः प्रद्युम्नः) |
| भुवनविदितः | - | लोकप्रसिद्धः |
| पाण्डवः फल्गुनः अहं | - | पाण्डुपुत्रः अर्जुनः अहं |
| स्मरहरशिरश्चण्डकोदण्ड | - | शिवस्य शिरसि कार्मुकखण्डस्य |
| काण्डप्रौढाघातव्रणगण | - | शक्त्या प्रहरणेन जातः |
| किणग्रन्थि | - | व्रणमुद्रासमूहयुक्तं |
| मे | - | मम |
| बाह्वोः | - | हस्तयोः |
| बलं | - | शक्तिं |
| व्यक्तं वक्ति। | - | व्यक्ततया सूचयति। |

**सारः**- अहं न श्रीकृष्णः, न बलरामः, न अनिरुद्धः, न जाम्बवतीपुत्रः साम्बः, न रुग्मिणीपुत्रः प्रद्युम्नः। किन्तु लोकप्रसिद्धः पाण्डुपुत्रः अर्जुनः भवाम्यहम्। शिवस्य शिरसि वारं वारं कार्मुकखण्डस्य शक्त्या प्रहरेण संजातव्रणकिणः मम हस्तयोः शक्तिं सूचयति।

**शृणुत शृणुत सर्वे पाण्डुसूनोः प्रतिज्ञां**
**सदसि पुनरपत्यं भावि भूमीसुरस्य।**
**करधृतशरचापः पालयिष्यामि नो चेत्**
**सकलजनसमक्षं सन्निवेक्ष्ये हुताशम्।।**

**पदच्छेदः**

| | | |
|---|---|---|
| पुनरपत्यं | - | पुनः + अपत्यं |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| सदसि | - | सभामध्ये |
| सर्वे | - | सर्वे जनाः |
| पाण्डुसूनोः | - | पाण्डुपुत्रस्य अर्जुनस्य |
| प्रतिज्ञां | - | सत्यवाचं |
| शृणुत शृणुत | - | सम्यक् शृण्वन्तु |
| पुनः भावि | - | इतः परं भविष्यन्तं |
| भूमीसुरस्य | - | ब्राह्मणस्य |
| अपत्यं | - | पुत्रं |
| करधृतशरचापः | - | शरचापधारी सन् |
| पालयिष्यामि | - | संरक्षिष्यामि |
| नो चेत् | - | न तथा चेत् |
| सकलजनसमक्षं | - | सर्वेषां जनानां पुरतः |
| हुताशं सन्निवेक्ष्ये। | - | अग्निं प्रवेक्ष्यामि। |

**सारः**- भोः सामाजिकाः! पाण्डुसूनोः अर्जुनस्य प्रतिज्ञां श्रुणुत। अस्य ब्राह्मणस्य इतःपरं जनिष्यमाणं पुत्रमहं संरक्षिष्यामि। मया न साधितं चेद् अहं सर्वजनसमक्षम् अग्निं प्रवेक्ष्यामि।

**जातञ्जातमपत्यमक्षियुगलग्राह्यं क्षणं तत्पुन-**
**स्त्वन्तर्द्धिं द्रुतमद्य वैद्युतमिव ज्योतिर्जगाहे पुनः।**
**हा हा निष्करुणेन दैवहतकेनैते जना वञ्चिता**
**इत्युच्चैः करुणं विलापमशृणोत्तस्मिन् क्षणे पाण्डवः।।**

**पदच्छेदः**

| | | |
|---|---|---|
| तत्पुनस्त्वन्तर्द्धिं | - | तत्पुनः+ तु +अन्तर्द्धिं |
| ज्योतिर्जगाहे | - | ज्योतिः +जगाहे |
| दैवहतकेनैते | - | दैवहतकेन + एते |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| क्षणं | - | क्षणकालं |
| अक्षियुगलग्राह्यं | - | प्रत्यक्षीभूतम् |
| जातं जातं अपत्यं तु | - | उत्पन्नः एकैक : पुत्रः तु |
| अद्य | - | सम्प्रति |
| वैद्युतं ज्योतिः इव | - | विद्युत्प्रकाशः इव |
| द्रुतं अन्तर्द्धिं जगाहे | - | झटित्येव अप्रत्यक्षमभवत् |
| पुनः पाण्डवः | - | पुनः अर्जुनः |
| तस्मिन् क्षणे | - | तस्मिन्नेव समये |
| हा हा | - | अहो कष्टम् |
| निष्करुणेन | - | करुणारहितेन |
| दैवहतकेन | - | दुर्विधिना |
| एते जनाः | - | वयं ब्राह्मणजनाः |
| वञ्चिताः | - | झलिताः |
| इति | - | एवं प्रकारेण |
| उच्चैः | - | अत्युच्चैः |
| करुणं विलापं | - | क्रन्दनं |
| अशृणोत् | - | श्रुतवान्। |

**सारः**- पुनः प्रत्यक्षीभूतः पुत्रः विद्युत्प्रकाशमिव अप्रत्यक्षोऽभूत्। 'अहो कष्टम्, करुणारहितेन दुर्विधिना च वयं वञ्चिताः' इत्येवम् अतिदीनं विलापं अर्जुनः श्रुतवान्।

**अथ तथाविथमनोरथः पृथ्वीसुरो, "हा धिक् अमुना जनेन सरसीरुहाक्षोऽप्यवज्ञातः कथं पुनरमुं कृपणजनबिन्धुं कृपासिन्धुं द्रक्ष्यामि वक्ष्यामि च दशामिमाम्" इत्यपत्यलोपशतगुणितमन्युश्शतमन्युसूनुं समाचष्ट।**

अथ अनन्तरं, तथाविथमनोरथः- तादृशमनोव्यापारयुक्तः , पृथ्वीसुरः- ब्राह्मणः हा धिक्- हा कष्टम्, अमुना जनेन- मया, सरसीरुहाक्षः अपि- कृष्णः अपि, अवज्ञातः- निन्दितः, कथं पुनः - पुनः केन प्रकारेण, कृपणजनबन्धुं - दीनजनबन्धुं कृपासिन्धुं- दयावारिधिं, द्रक्ष्यामि- पश्यामि वक्ष्यामि- वदिष्यामि, इमां दशां - इमाम् , अवस्थाम् इति - एवम्, अपत्यलोपशतगुणितमन्युः - पुत्रनष्टेन शतगुणीभूतेन क्रोधेन सहितः , शतमन्युसूनुं- इन्द्रपुत्रं, समाचष्ट- उवाच।

**सत्यव्रतस्य जगति प्रथितस्य तस्य**
**धर्मात्मजस्य धुरि धर्मभृतां स्थितस्य।**
**व्रीलाभरावनताननमद्य लोक**
**आलोकयिष्यति कथं तव दुश्चरित्रैः।।**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| जगति प्रथितस्य | - | लोकप्रसिद्धस्य |
| सत्यव्रतस्य तस्य | - | सत्यपालकस्य तस्य |
| धर्मभृतां धुरि स्थितस्य | - | धर्मिष्टेषु अग्रिमस्य |
| अद्य तव दुश्चरित्रैः | - | अद्य तव दुश्चरितैः |
| व्रीलाभरावनताननम् | - | लज्जाभारेण अवनमितवदनं |
| कथं लोकंमालोकयिष्यति? | - | जनाः कथं द्रक्ष्यन्ति? (द्रष्टुं न शक्नुवन्ति इति भावः) |

**सारः**

लोकप्रसिद्धानां सत्यव्रतानां श्रेष्ठस्य तव लज्जाभारेण अवनमितं मुखम् अद्य जनाः कथं द्रक्ष्यन्ति?

**प्रदक्षिणीकृत्य सुरेन्द्रसूना-**
**वह्नाय वह्नौ पतितुं प्रवृत्ते।**
**तदन्तरायं तरसाऽचिरांशुः**
**पीताम्बरः कृष्णघनस्ततान।।**

**पदच्छेदः**

| | | |
|---|---|---|
| सुरेन्द्रसूनावह्नाय | - | सुरेन्द्रसूनौ +अह्नाय |
| कृष्णघनस्ततान | - | कृष्णघनः + ततान |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| सुरेन्द्रसूनौ | - | अर्जुने |
| प्रदक्षिणीकृत्य | - | (अग्निं) प्रकर्षेण दक्षिणीकृत्य गत्वा |
| अह्नाय | - | झटिति |
| वह्नौ | - | अग्नौ |
| पतितुं प्रवृत्ते | - | निपतितुं समारब्धे (सति) |
| अचिरांशुः | - | विद्युत्सहितः |
| पीताम्बरः | - | पीतवस्त्रधारी |
| कृष्णघनः | - | मेघसदृशः श्रीकृष्णः |
| तरसा | - | झटिति |
| तदन्तरायं | - | तस्य विघ्नम् |
| ततान। | - | अकरोत्। |

**सारः**

यदा अर्जुनः अग्निं प्रवेष्टुमारब्धवान् तदा श्रीकृष्णः तस्य अर्जुनस्य विघ्नमुत्पाद्य अग्निप्रवेशं निरुद्धवान्।

**आलम्ब्य सख्युः करमम्बुजाक्षः**
**करेण भृत्यार्तिहरेण सद्य।**
**आशास्पदं गोकुलसुन्दरीणां**
**पाशाधराशाभिमुखः प्रतस्थे।।**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| सद्य अम्बुजाक्षः | - | सद्य श्रीकृष्णः |
| भृत्यार्तिहरेण | - | भक्तानां दुःखनाशकेन |
| करेण | - | हस्तेन |
| सख्युः करम् | - | मित्रस्य हस्तम् |
| आलम्ब्य | - | गृहीत्वा |
| गोकुलसुन्दरीणां | - | गोपस्त्रीणां |
| आशास्पदं | - | आश्रयं ( स कृष्णः) |
| पाशाधराशाभिमुखः | - | वरुणदेवस्य दिशं (पश्चिमां दिशं) |
| प्रतस्थे। | - | (प्रति)प्रस्थानं कृतवान्। |

**सारः**

झटिति गोपिकावल्लभः श्रीकृष्णः भक्तानां दुःखनाशाय समर्थेन करेण स्वमित्रस्य अर्जुनस्य करं गृहीत्वा पश्चिमां दिशं (वरुणदेशं) प्रति प्रतस्थे। व्याकरणकार्यम् - प्रतस्थे इत्यत्र प्रपूर्वक स्था (ष्ठा) धातोः ‘समवप्रविभ्यः स्थः’ इति सूत्रेण आत्मनेपदित्वं लभते।

**ततश्च तौ प्लवङ्गमविहङ्गमध्वजौ जाज्वलद्वज्रमणिप्रवलयदीप्रपरिसरं, सततसन्निहितविनायकोपशोभितं सर्वमङ्गलोपेतं अवाङ्मनसगोचराद्भुतनिदानं लोकमालोकयाञ्चक्रतुः।**

ततः च- अनन्तरं, तौ- कृष्णार्जुनौ, प्लवङ्गमविहङ्गमध्वजौ- प्लवङ्गमः विहङ्गमःच ध्वजे ययोः तौ- कपिध्वजः(अर्जुनः) गरुडध्वजः(कृष्णः) च, जाज्वलत्-

अतिशयेन ज्वलत्, वज्रमणिप्रवलयदीप्रपरिसरं- वज्रमणिना युक्तेन प्रवलयेन शोभमानं प्रदेशं, सततसन्निहितविनायकोपशोभितं - सदा सन्निहितेन गरुडेन परिशोभितम्, सर्वमङ्गलोपेतम् सर्वमङ्गलैः सहितं, अवाङ्मनसगोचराद्भुतनिदानं- वाचा- मनसा वा अप्राप्यानामद्भुतानामाकरम् लोकम्, आलोकयाञ्चक्रतुः - अवलोकितवन्तौ। विनायकः- गरुडः, विष्णुः, शिवः इत्याद्यर्थाः।

**कच्चित् कृष्णकिरीटिनौ कुशलिनौ विश्वैकवीरौ युवां**
**युष्मद्दर्शनकौतुकान्ननु मया नीता द्विजस्यार्भकाः।**
**एतत्पोतसमर्पणेन कृपणैस्तद्धर्मदारैस्समं**
**पातं पातमगाधशोकजलधेरन्तर्भजन्तं द्विजम्।।**

**पदच्छेदः**

युष्मद्दर्शनकौतुकान्ननु - युष्मद्दर्शनकौतुकात् +ननु
कृपणैस्तद्धर्मदारैस्समं - कृपणैः + तत् +धर्मदारैः +समं
पातमगाधशोकजलधेरन्तर्भजन्तं - पातम् + अगाधशोकजलधेः+ अन्तः +भजन्तम्

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| विश्वैकवीरौ | - | विश्वप्रसिद्धौ वीरौ |
| युवां कृष्णकिरीटिनौ | - | भवन्तौ कृष्णार्जुनौ |
| कुशलिनौ कच्चित् | - | सुखिनौ किम्? |
| युष्मद्दर्शनकौतुकात् | - | युष्माकं दर्शनस्य हेतोः |
| मया | - | मया विष्णुना |
| द्विजस्य अर्भकाः | - | ब्राह्मणस्य पुत्राः |
| नीताः ननु | - | आनीताः खलु |
| एतत्पोतसमर्पणेन | - | अनेन पुत्रसमर्पणेन |

| | | |
|---|---|---|
| कृपणैः | - | दीनैः |
| तद्धर्मदारैः समं | - | तस्य भार्यया साकं |
| अगाधशोकजलधेः अन्तः | - | दुःखसागरस्य अन्तर्भागे |
| भजन्तं द्विजं | - | मग्नं ब्राह्मणं |
| पातं पातम् | - | निश्चयेन पातव्यम् । |

दारशब्दः नित्यं बहुवचनान्तः।

**सारः-**

भोः विश्वैकवीरौ कृष्णार्जुनौ, भवन्तौ कुशलिनौ ननु। युवयोः दर्शनार्थमेव विष्णुना मया ब्राह्मणपुत्राः अपहृताः। ब्राह्मणपुत्राणां समर्पणेन दुःखसागरे निमग्नौ ब्राह्मणं ब्राह्मणीं च संरक्षयत।

**ततश्च क्षमासुरः क्षणमात्रमानन्दमूर्च्छाम् अनुभूय कथमपि शनैर्नयनारविन्दमुन्मीलयन् आमोदभरगद्गदाक्षरां सरस्वतीमुत्सारयामास।**

ततश्च- पुत्रसमर्पणानन्तरं, क्षमासुरः ब्राह्मणः, क्षणमात्रमानन्दमूर्च्छाम् अनुभूय- क्षणकालं अत्यधिकानन्दम् अनुभवन्, कथमपि- यथाकथञ्चित्, शनैर्नयनारविन्दमुन्मीलयन्- मन्दम् अरविन्दसुन्दरं नयनम् उन्मील्य आमोदभरगद्गदाक्षरां सन्तोषपूर्वं गद्गदाक्षरां, सरस्वतीं - वाचं , उत्सारयामास- उत्ससर्ज, अवोचत् इत्यर्थः।

**विप्राशीर्वचनप्रहृष्टवदनः कृष्णस्स्वयं जिष्णुना**
**कीर्त्या कार्तिकचन्द्रिकाधवलया भूमण्डलं मण्डयन्।**
**इत्थं भक्तविधेयतामतिजगल्लीलाभिरावेदय-**
**न्नध्यास्त स्वपुरीं पुरन्दरपुरीवन्द्यां जनान् नन्दयन्।।**

**पदच्छेदः**

| | | |
|---|---|---|
| कृष्णस्स्वयं | - | कृष्णः + स्वयं |
| अतिजगल्लीलाभिरावेदयन्नध्यास्त | - | अतिजगल्लीलाभिः + आवेदयन् + अध्यास्त |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| विप्राशीर्वचनप्रहृष्टवदनः | - | ब्राह्मणस्य आशीर्वादेन सन्तुष्टवदनः |
| कृष्णः स्वयं | - | स्वयं श्रीकृष्णः |
| जिष्णुना | - | अर्जुनेन सह |
| कार्तिकचन्द्रिकाधवलया | - | कृत्तिकादिवसीयया चन्द्रिकासमानया श्वेतया |
| कीर्त्या | - | यशसा |
| भूमण्डलं मण्डयन् | - | लोकं भूषयन् |
| अतिजगल्लीलाभिः | - | अलौकिकलीलाभिः |
| भक्तविधेयतां | - | भक्तदासतां |
| इत्थम् आवेदयन् | - | एवं प्रबोधयन् |
| जनान् नन्दयन् | - | लोकान् सन्तोषयन् |
| पुरन्दरीवन्द्यां स्वपुरीं | - | अमरावतीमपि अतिशायिनीं द्वारकां |
| अध्यास्त | - | अध्युवास। |

**सारः-**

ब्राह्मणस्य कृतज्ञतावाचनेन तुष्टहृदयः श्रीकृष्णः अर्जुनेन सह चन्द्रिकासमानया यशसा लोकम् अलङ्कुर्वन् स्वर्गातिशायिन्यां द्वारकायाम् उवास।



## पठनप्रवर्तनानि

१. **नूतनपदचयनं कृत्वा शब्दकोशे निवेशयतु।**

श्रद्धेयाः अंशाः।

- नूतनपदानां चयनम्।
- अर्थनिर्धारणम्।
- पदकोशनिवेशनम्।

२. **सन्धिच्छेदं कृत्वा कोशे निवेशयतु।**

श्रद्धेयाः अंशाः।

- सन्धियुक्तपदचयनम्।
- सन्धिविश्लेषणम्।
- सन्धिकृतपदकोशे निवेशनम्।

३. **समासान् विवेचयतु।**

श्रद्धेयाः अंशाः।

- समस्तपदचयनम्।
- विग्रहवाक्यलेखनम्।
- विग्रहपदकोशनिवेशनम्।

४. **चम्पूकाव्यस्य विशेषतामधिकृत्य चर्चां कुरुत।**

श्रद्धेयाः अंशाः।

- काव्यस्य घटना।
- प्रतिपादन रीतिः।
- आस्वादनक्षमता।

# १.३
# बृहत्त्रयी





## प्रवेशकः

निर्मले मनसि या कवित्वशक्तिः अङ्कुरति सा प्रतिभाविलासेन प्रकर्षं प्राप्नोति। तादृशप्रतिभाधनैःअङ्गुलीपरिमितैः कविभिः धन्येयं धरा। तेषु स्वप्रतिभाविलासैः संस्कृतकाव्यमण्डले नितरां शोभमानाः भवन्ति माघः भारविः श्रीहर्षश्च। तान् महाकवीन् तेषां रचनाश्च अधिकृत्य पठामः।

**शिशुपालवधम्, किरातार्जुनीयम्, नैषधम् इति त्रीणि पञ्चमहाकाव्येष्वन्तर्गतानि भवन्ति। एतानि एव बृहत्त्रयी इत्यपरनाम्ना प्रथितानि।**

**उक्तं च-**

**काव्याभिव्यक्तौ गुणसौष्ठवे च**
**बृहत्त्रयी काव्यललामभूता।**
**भाषानवद्या ललिता च हृद्या**
**स्वरस्य माधुर्यमिहास्ति दृश्यम्।। इति**

**शिशुपालवधम् माघेन, किरातार्जुनीयम् भारविना, नैषधम् श्रीहर्षेण च विरचितम्।**

तथाहिः- उपमा कालिदासस्य
भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यम्
माघे सन्ति त्रयो गुणाः।।

तावद्भा भारवेर्भाति
यावन्माघस्य नोदयः।
उदिते नैषधे काव्ये
क्व माघः क्व च भारविः।। इति च त्रयाणामपि काव्यानां वैशिष्ट्यम् उद्घोषयति।

**शिशुपालवधम्- माघः**

इदं काव्यं कविनाम्ना माघमित्यपि व्यपदिश्यते। अनेन व्यपदेशेन कवेरस्य अनुपमप्रतिभाविलासं द्योत्यते। तस्य जन्म सप्तमे शतके आसीत्। सुप्रभदेवः अस्य पितामहः श्रीदत्तकोऽस्य जनकश्च आसीत्।

प्रकीर्त्यतेऽत्र शिशुपालवृतम्
औद्धत्यपूर्णम् अपमानकारि।
कृष्णेन सार्धं कलहो विवादः
कृष्णेन चक्रेण वधोऽधमस्य।।

माघः कविर्भारतरत्नभूतो
विद्योतते खे तरणिस्वरूपः।
काव्यं च तस्य प्रथितं जगत्यां
बृहत्त्रयीरत्नस्वरूपमेव।।

अस्मिन् काव्ये प्रसिद्धतमः श्लोकोऽयम्-

उदयति विततोर्ध्वरश्मिरज्जा-
वहिमरुचौ हिमधाम्नि याति चास्तम्।
वहति गिरिरयं विलम्बिघण्टा-
द्वयपरिवारितवारणेन्द्रलीलाम्।। (सर्गः-४ श्लोकः -२०)

उदयतीति- वितता ऊर्ध्वाश्च रश्मिरज्जवो रश्मयो रज्जव इव यस्य तस्मिन्विततोर्ध्वरश्मिरज्जौ अहिमरुचौ सूर्ये उदयति उदयमाने। (अय गतौ। सति सप्तमी।) तथा विततोर्ध्वरश्मिरज्जौ हिमधाम्नि चन्द्रे चास्तं याति अस्तमयमाने (सति सप्तमी)। अयं गिरिः रैवतपर्वतः विलम्बिना विशेषं लम्बमानेन घण्टाद्वयेन परिवारितस्य वेष्टितस्य वारणेन्द्रस्य लीलां शोभां वहति।

अत्र गिरिः वारणेन्द्रस्य लीलां वहतीति वाक्यार्थैक्यारेपान्निदर्शना। तथा सूर्यचन्द्रमसौ अस्य कुक्षिसमानकक्षां बिभ्रत इति महदौन्नत्यं व्यज्यते। पुष्पिताग्रा वृत्तम्। (अयुजि नयुगरेफतो यकारो । युजि च नजौ जरगाश्च पुष्पिताग्रा।।) रैवतकपर्वतस्य आधुनिकनाम 'गिर्नार्' इति। अत्र प्रचलिते उत्सवे सुभद्राहरणं संजातमिति भागवतदशमस्कन्धे, महाभारतस्य आदिपर्वणि एकोनविंशत्युत्तरद्विशततमे अध्याये प्रतिपादयति।

विततोर्ध्वरश्मिरज्जौ अहिमरुचौ उदयति तथा विततोर्ध्वरश्मिरज्जौ हिमधाम्नि च अस्तं याति अयं गिरिः विलम्बिघण्टाद्वयं परिवारितवारणेन्द्रलीलां वहति इति।

अस्याः निदर्शनायाः माहात्म्येन अयं कविः "घण्टामाघः" इति प्रथितो बभूव।

अलङ्कारः- निदर्शना- वाक्यार्थयोस्सदृशयोरैक्यारोपो निदर्शना।

## किरातार्जुनीयम्- भारविः।

महाकवेः भारवेः जीवितकालः क्रिस्तोः परं सप्तमशतके आसीदिति विश्वासः। तस्य संपूर्णं चरित्रं न लभ्यते। सः दाक्षिणात्यः शैवधर्मावलम्बी इति मन्यते। सः सिंहविष्णुरिति नृपस्य आश्रितः आसीत्। तस्य जनकः श्रीधरः, माता सुशीला, पत्नी रसिका च। किरातार्जुनीयम् इत्येकेन काव्येनैव सः विश्वविख्यातः बभूव। सर्गाणामन्ते लक्ष्मीपदप्रयोगाद् 'लक्ष्मीपदलाञ्छनः' इति बहुमतिः लब्धा। पाशुपतास्त्रलाभाय अर्जुनेन कृतं तीव्रं तपः तमर्जुनं परीक्षितुमागतं किरातवेषधारिणं शिवं सम्मुखीकृत्य युद्धं च किरातार्जुनीये महाकाव्ये वर्ण्यते। तत्र पञ्चमे सर्गे एकोनचत्वारिंशत्तमेन श्लोकेन सः "छत्रभारविः" इति प्रसिद्धोऽभूत्। श्लोकः-

उत्फुल्लस्थलनलिनीवनादमुष्माद्
उद्भूतः सरसिजसम्भवः परागः।
वात्याभिर्वियति विवर्तितः समन्तात्
आधत्ते कनकमयातपत्रलक्ष्मीम्।।

| अन्वयः | | अर्थः |
|---|---|---|
| वात्याभिः | - | मरुद्भिः |
| उत्फुल्लस्थलनलिनीवनादमुष्माद् | - | अस्मात् विकचस्थलकमलवनाद् |
| उद्भूतः | - | उत्कीर्णः |
| सरसिजसम्भवः परागः | - | अम्बुजपुष्परेणुः |
| वियति | - | आकाशे |
| विवर्तितः | - | विस्तृतः |
| समन्तात् | - | परितः |

कनकमयातपत्रलक्ष्मीं - सुवर्णमयछत्रशोभां
आधत्ते - वहति।

**अलङ्कारः उत्प्रेक्षा**

सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।

**वृत्तम् - प्रहर्षिणी।**

मनौज्रौगस्त्रिदशयतिप्रहर्षिणीयम्।

अमुष्माद् उत्फुल्लस्थलनलिनीवनादुद्भूतः वात्याभिः वियति विवर्तितः सरसिजसम्भवः परागः समन्ताद् कनकमयातपत्रलक्ष्मीम् आधत्ते।

**नैषधम् - श्रीहर्षः**

**श्रीहर्षः कान्यकुब्जराजस्य जयचन्द्रस्य आश्रितः आसीत्। तस्य पिता श्रीहीरपण्डितः माता मामल्लदेवी च। सः द्वादशशतके लब्धजन्माऽभूत्। सः दशग्रन्थान् व्यरचयत्। तस्य प्रसिद्धतमे काव्ये नैषधे द्वाविंशतिः सर्गाः सन्ति। सर्गाणामन्ते आनन्दपदप्रयोगात् तस्य "आनन्दलाञ्छनः" इत्यपि प्रथा अस्ति। नैषधीये नलस्य दमयन्त्याः च कथां प्रस्तौति । नैषधीयस्य प्रामुख्यं स्पष्टीकृत्य "नैषधं विद्वदौषधम्" इति उक्तिरस्ति। नैषधे प्रसिद्धेषु श्लोकेष्वन्यतमः श्लोकोऽयम्-**

**इतीरिता पत्ररथेन तेन**
**ह्रीणा च हृष्टा च बभाण भैमी।**
**चेतो नलं कामयते मदीयं**
**नान्यत्र कुत्रापि च साभिलाषम्।।**

**तेन पत्ररथेन इति ईरिता ह्रीणा हृष्टा च भैमी बभाण च। मदीयं चेतः नलं कामयते, कुत्रापि अन्यत्र च साभिलाषं न।**

| अन्वयः | | अर्थः |
|---|---|---|
| पत्ररथेन | - | पक्षिणा हंसेन |
| इतीरिता | - | एवम् उक्ता |
| ह्रीणा | - | लज्जया |
| हृष्टा च | - | तुष्टा च |
| भैमी | - | दमयन्ती, भीमस्य अपत्यं स्त्री |
| बभाण च | - | अवदत् च |
| नान्यत्र कुत्रापि | - | नेतरे वस्तुनि |
| साभिलाषं | - | अभिलाषपूर्वम् |
| मदीयं चेतः | - | मम मनः |
| नलं | - | राजानं नलं |
| कामयते | - | अभिषति (इति)। |

"चेतो नलं कामयते मदीयम्" इत्यत्र श्लेषार्थः एवम्-
चेतो न लङ्कां अयते मदीयम्।
चेतः अनलं कामयते मदीयम्।
अन्यथा अहं अग्निं आश्रये। नैषधस्य व्याख्यातारौ मल्लीनाथः, विद्याधरश्च अस्य श्लेषस्य वरिष्ठतां प्रकीर्तयति।

अलङ्कारः - श्लेषः।
वृत्तम् - उपजातिः।



# पठनप्रवर्तनानि

१. **नूतनपदचयनं कृत्वा शब्दकोशे निवेशयतु।**

श्रद्धेयाः अंशाः।

- नूतनपदानां चयनम्।
- अर्थनिर्धारणम्।
- पदकोशनिवेशनम्।

२. **बृहत्त्रयीं तत्कर्त्तृन् च अधिकृत्य टिप्पणीं लिखतु।**

श्रद्धेयाः अंशाः।

- उपन्यासपठनम्।
- आशयक्रोडीकरणम्।
- टिप्पणीलेखनम्।



# अभ्यासः

१. **समासान् विवेचयतु।**

**श्रद्धेयाः अंशाः।**

- समस्तपदचयनम्।
- विग्रहवाक्यलेखनम्।
- विग्रहपदकोशनिवेशनम्।

२. **स्तोत्रकाव्यं कर्तारं च अधिकृत्य लघुटिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः।**

- स्तोत्रकाव्यपठनम्।
- आशयक्रोडीकरणम्।
- टिप्पणीलेखनम्।

३. **अन्वयं लिखतु।**

**श्रद्धेयाः अंशाः।**

- श्लोकपठनम्।
- पदच्छेदलेखनम्।
- अन्वयलेखनम्।

४. **आशयं लिखतु।**

**श्रद्धेयाः अंशाः।**

- श्लोकपठनम्।
- आशयक्रोडीकरणम्।
- आशयलेखनम्।

५. **आस्वादनटीकां लिखतु।**

**श्रद्धेयाः अंशाः।**

- श्लोकपठनम्।
- आशयक्रोडीकरणम्।
- आस्वादनटीकालेखनम्।

६. **चम्पूकाव्यम् तत्कर्तारं च अधिकृत्य लघुटिप्पणीं लिखत।**

**श्रद्धेयाः अंशाः।**

- चम्पूकाव्यपठनम्।
- आशयक्रोडीकरणम्।
- टिप्पणीलेखनम्।

७. **चम्पूप्रभाषणम् अवतारयतु।**

**श्रद्धेयाः अंशाः।**

- चम्पूकाव्यपठनम्।
- आशयव्यक्तता।
- अक्षरस्फुटता।
- अवतरणम्।

८. **दण्डान्वयखण्डान्वयरीत्या च शलोकानाम् अन्वयं लिखतु।**

**श्रद्धेयाः अंशाः।**

- पदविवेचनम्।
- आशयावगमनम्।
- अन्वयलेखनम्।

## किमधिगतम् ?

**पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं(√) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः |
|---|---|---|---|---|
| १. | काव्यालापनम् | | | |
| २. | नूतनपदचयनम् | | | |
| ३. | सन्धिच्छेदः | | | |
| ४. | समासः | | | |
| ५. | अन्वयः | | | |
| ६. | आशयलेखनम् | | | |
| ७. | टिप्पणीलेखनम् | | | |
| ८. | अन्वयलेखनम् | | | |
| ९. | आस्वादनलेखनम् | | | |
| १०. | चम्पूप्रभाषणावतरणम् | | | |

# एककम्-२



# विवेकिता

# एककम्-२

## आमुखम्

गुरोः अनुग्रहेण प्रतिभाविलासेन च सम्पुष्टं शास्त्रज्ञानं प्रयुक्तिपथम् आनीते सति सार्थकतां प्राप्नोति। तदर्थं प्रायोगिकजीवनस्य तत्त्वान्यपि ज्ञातव्यानि। तत्र "त्याज्यं किम्"? "ग्राह्यं किम्"? "कृत्यं किम्"? "अकृत्यम् किम्"? इति विवेकः छात्राणां सुतराम् आवश्यकः।

"बुद्धिरेव गरीयसी" इति संज्ञिते अतीतवर्षीये पाठभागे ज्ञानिनः अपि विवेकरहिताः नाशं प्राप्नुवन्ति इति अधीतम्। अस्य एककस्य प्रथमे पाठभागे प्राप्तविद्योऽपि श्वेतकेतुः प्रायोगिकविज्ञानावाप्त्यै गुरोः सकाशमागच्छत्। गुरोराज्ञामनुसृत्य प्रकृत्यां जीवजालैस्सह जीवितयाथार्थ्यं ज्ञात्वा प्रतिनिवृत्तवान्। प्रायोगिकज्ञानस्य आर्जनाय वयं सन्नद्धा भवामः। छान्दोग्योपनिषदि वर्तमानम् उद्दालकश्वेतकेतुवृत्तान्तमेवात्र पाठस्य आधारः।

शूद्रकेण विरचितं मृच्छकटिकम् नाम नाटकं संस्कृतसाहित्ये नितरां शोभते। दरिद्रतां मुख्येतिवृत्तत्वेन स्वीकृत्य रचितं नाटकं भवति मृच्छकटिकम्। साङ्केतिकतया मृच्छकटिकम् प्रकरणविभागे अन्तर्भवति। संस्कृतसाहित्ये नाटकानां सामान्यतया रूपकमिति व्यवहारः। कथापात्राणां रूपारोपादेव रूपकमिति संज्ञा। नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवाकारः, वीथी, अङ्कम्, ईहामृगः चेति रूपकाणि दश।

"वस्तुनेतृरसास्तेषां रूपकाणां हि भेदकाः" इति। कथावस्तूनां नायकानां रसानाञ्च भिन्नतया नाटकानां मिथो भेदः दृश्यते। पुराणादिप्रसिद्धमितिवृत्तञ्चेत्

नाटकं तथा कविकल्पितञ्चेत् प्रकरणञ्च।

कथापात्रस्वीकारे रससन्निवेशे च शूद्रकः कृतहस्तः एव। नाटकीयसन्दर्भाणां वैविध्येन सौकुमार्येण माधुर्येण च 'मृच्छकटिकम्' श्रेष्ठं भवति। तस्य भारते विदेशेष्वपि अनेके आस्वादकाः सन्ति। समकालिकसमाजस्य सजीवस्पन्दनम् अपि अस्मिन् द्रष्टुं शक्यते। अनुवाचकेषु हर्ष-जिज्ञासा- अद्भुत- अनुकम्पा- भयादिभावान् प्रस्फुरयितुं पर्याप्तं भवति इदं दृश्यकाव्यम्।

मृच्छकटिके दशाङ्काः सन्ति। तेषु प्रथमाङ्कात् स्वीकृतोऽयं द्वितीयः पाठभागः। दारिद्र्यविषये चारुदत्तस्य तत्सुहृदः विदूषकस्य मैत्रेयस्य च भाषणमेवात्र पाठभागेन स्वीकृतम्।



## पठनाधिगमाः

- गद्यं वाचयति।
- स्ववाक्यैः लिखति।
- कथायाः आस्वादनं लिखति।
- कथां संभाषणरूपेण परिवर्तयति।
- जीवितमूल्यानि विविच्य लिखति।
- रूपकभेदानधिकृत्य टिप्पणीं लिखति।
- रूपकस्याशयं कथारूपेण परिवर्त्य लिखति।
- पात्रस्वरूपं निरूप्य लघुटिप्पणीं लिखति।
- रूपकं पठित्वा पात्राभिनयं करोति।
- क्रियापुटं पूरयति।



आचार्यात् पादमादत्ते, पादं शिष्यस्स्वमेधया।
पादं सब्रह्मचारिभ्यो, पादं कालक्रमेण च।।

# २.१

# ज्ञानोदयः



## प्रवेशकः

तथा - 'ज्ञानं तपश्च विनायान्वितमेव मान्यम्' इति च सर्वसम्मतमेव। सर्वेषां मातापितरौ जन्मगुरवः, अध्यापकाः विद्यागुरवः, इतरे गुरुस्थानीयाश्च लोके विद्यन्ते। ते एव आचार्याः। तेषां प्रभावेण, तैः प्रदत्तैः जीवितानुभवैः स्वार्जितानुभवैः तथा सुहृदनुभवैश्च मर्त्यानां ज्ञानं नवं नवं पुष्टपूर्णं च परिणमति इति शास्त्रप्रसिद्धिः। एवं विनायान्वितमेव ज्ञानं तपश्च समाजे मान्यं भवेत्।

भारतीयविज्ञानस्य आकरः भवति उपनिषदः। उपनिषत्सु आध्यात्मिकविद्या एव प्रधानप्रतिपाद्यविषयः। तत्र छान्दोग्योपनिषदि विद्यमाना एका कथा पाठरूपेण अत्र प्रस्तूयते।

हे छात्राः! भवन्तः विशिष्टानां गुरुजनानां जीवितानुभवान् स्वांशीकृत्य एव पुरो गच्छन्ति किल? एवं चेत् भवतां जीवने के के व्यक्तिविशेषाः स्वाधीनताम् अकुर्वन्?

श्वेतकेतुः गुरुकुले वर्षाणि उषित्वा सकलविद्याः जग्राह। ततः गुरुदक्षिणां दत्वा स्वभवनं प्रतिन्यवर्तत। बहुकालानन्तरं पुत्रं दृष्ट्वा पिता उद्दालकः अह्लादितचित्तः अभवत्। दूरादागतं पुत्रम् अभिनन्दितुम् आबहिस्तोरणं जगाम च। आत्मानं सर्वज्ञं मन्यमानस्य तस्य कुमारस्य वदनकमलं गर्वेण सूर्यतेजसा इव दीप्तमभवत्। लोकज्ञस्य शास्त्रनिपुणस्य पितुः मुखं तद्दर्शनक्षण एव शोकछविना व्यापृतं मुद्रितमिवाभवत्। सर्वोपचारान् परिगृह्य पुत्रः पितरम् उपेत्य यदा अनमत् तदा "दीर्घायुः भव" इति वचोभिः अन्वगृहीत्, अपृच्छच्च "किमधीतवान्" इति। आकस्मिकेन प्रश्नेन सन्दिग्धः सः किञ्चित् इव मौनमास्थाय सोत्कम्पं "सर्वविद्यासु निष्णातोऽहम्" इति प्रत्यवदत्।

निशम्यैतद् खिन्नमानसः पिता "पुत्र! पठितव्यं त्वया न पठितम्। तस्मात् तीर्थकुलम् उपगम्य सकललोकहितैषिणं गुरुश्रेष्ठम् शुश्रूषस्व। पुनः अधीतविद्यः सन् आगच्छतु" इति।

उपगम्य गुरुकुलं सः कुमारः अतीतं सर्वं वृत्तान्तम् गुरुम् आश्रावयत् । श्रुत्वा च स्मयमानः गुरुः एवम् अवोचयत्. "वत्स! अस्मिन् गुरुकुले द्वावजौ वर्तेते। एतौ आदाय वनं याहि। यदा अजानां संख्या सहस्रतमम् उपेष्यति तदा प्रत्यागच्छ" इति। गुरोरनुज्ञां शिरसि निधाय मूकीभूतः सन् वनम् अगात्। मृगाणां संरक्षणे पोषणे च अनभिज्ञः सः कुमारः क्लेशेन तावपोषयत् बह्वशोचच्च । गच्छता कालेन अजा तिस्रः सन्ततीः प्रासूत। अजपोतानां क्रीडासु उन्मग्नः सः अजपरिपालन एव श्रद्धालुरजायत। परन्तु एकस्मिन् अहनि मृगपोतं पश्यतोहरं श्रृगालं वीक्ष्य अतीव खिन्नः अवर्तत। ततः प्रभृत्यसौ निद्रां परित्यज्य अजपालनेनैव स्वजीवितम् अनैषीत् । कालान्तरे अजानां चेष्टितानि, इङ्गितानि, निमिषितानि च ज्ञात्वा सः राजपुत्रः पशुपक्षिवृक्षलतादीनां जीवनचर्यायाम् अन्यूनम् अपृथक्त्वम् अन्वभूत्।

अतीतेषु हायनेषु सः कौतुकेन हेतुना अजानां गणनां कृतवान्। प्रभूतं

**अजवृन्दं गुरोः निर्देशम् अतिक्रम्य वर्तते इत्यवधार्य मृगपक्षीन् उपेक्ष्य गन्तुमशक्तोऽपि गुरुनिर्देशं पालयितुम् आश्रममगच्छच्च।**

**शिष्यदर्शनेन प्रीतमानसः सः गुरुः तं युवकं मुहुर्मुहुरनुगृह्य पितुस्सकाशं प्राहिणोत्। तं वीक्ष्य च वृद्धः पिता "विनयसम्पन्नः संवृत्तः मे सुतः" इति असाधारणम् आनन्दम् अविन्दत। गाढाश्लेषैः सह पिता स्वकीयं अनुग्रहातिरेकं पुत्रे समर्पितवान्।**

---

जग्राह- स्वीचकार (विद्यां पठितवान्) ग्रह उपादाने- पर लिट् प्र.पु ए.व। काव्यशास्त्रज्ञं- काव्यानि शास्त्राणि च जानातीति काव्यशास्त्रज्ञः, तम्। आबहिस्तोरणं बहिस्तोरणपर्यन्तम्। सर्वज्ञं सर्वं जानातीति सर्वज्ञः, तम्। मह्याः पतिः महीपतिः, तस्य महीपतेः। आकस्मिकेन- अकस्मात् सहसा आगतम् आकस्मिकं, तेन। सन्दिग्धः संशयालुः। मौनमास्थाय- मौनम् +आस्थाय । आस्थाय स्थित्वा। सोत्कम्पं कम्पेन सह वर्तते इति। निष्णातोऽहम्-निष्णातः +अहम्। निष्णातः समर्थः। खिन्नं मानसं येन सः खिन्नमानसः। पठितुं योग्यं पठितव्यम्। श्रोतुमिच्छा शुश्रूषा। शुश्रूषस्व - श्रु श्रवणे आत्म लोट् म. पु. ए.व। अधीतविद्यः- अधीताः विद्याः येन सः। तीर्थम्- गुरुकुलम्।

अश्रावयत्- कथितवान्। श्रु श्रवणे णिचि पर. लङ् प्र.पु ए.व। अवोचत्- अवदत्। वच् पर. लङ् प्र.पु ए.व। द्वावजौ- द्वौ +अजौ। वर्तेते- वृतु वर्तने आत्म लट् प्र.पु द्वि.व। गृह्णानः- अजौ गृह्णानः (अजौ स्वीकुर्वाणः) प्रत्यागच्छतु- प्रति +आङ्- गम्लृ गमने पर लोट् प्र.पु ए.व। अगात् इण् गतौ पर लुङ् प्र.पु ए.व। इण् धातोः लुङि गा इत्यादेशः स्यात्। न अभिज्ञः अनभिज्ञः। तावपोषयत्- तौ +अपोषयत्। अपोषयत्- पुष पोषणे णिचि पर लङ् प्र.पु ए.व। बह्वशोचत्- बहु +अशोचत्। शुच शोके पर लङ् प्रपु ए। दुःखमनुभूतवान्। प्रासूत- प्र षु प्रसवे आत्म- लङ् प्र.पु ए.व। अह्नि- दिने। पश्यतोहरं- पश्यन् एव समये अपहरन्तम्।

प्रभृत्यसौ- प्रभृति + असौ। अनैषीत् - णीञ् प्रापणे पर .लुङ् प्र. पु ए.व। अन्वभूत्- अनु भू सत्तायां पर लुङ् प्र. पु ए.व।

वृन्दं - समूहम्। इत्यवधार्य - इति +अवधार्य । अवधार्य- अव -धृञ् धारणे +ल्यप्। प्राहिणोत्- प्रेषयामास। प्र हि गतौ पर लङ् प्र.पु ए.व। अविन्दत- अलभत।



## पठनप्रवर्तनानि

१. **कथाम् उच्चैः कक्ष्यायाम् अवतारयतु।**

श्रद्धेयौ अंशौ।

- आशयावगमनम्।
- सभावावतरणम्।

२. **कथाम् पठित्वा आशयान् स्ववाक्यैः लिखतु।**

श्रद्धेयाः अंशाः।

- कथावाचनम्।
- आशयावगमनम्।
- आशयलेखनम्।

३. **सन्धियुक्तपदानां पट्टिकां करोतु।**

श्रद्धेयाः अंशाः।

- सन्धियुक्तपदचयनम्।
- सन्धिविश्लेषणम्।
- पट्टिकाकरणम्।

# २.२

# मृच्छकटिकम्





## प्रवेशकः

सुखदुःखसम्मिश्रे जीविते धनस्याधिकं प्राधान्यं नास्ति। तथापि दारिद्र्यं दयनीया दशा एव। ताम् अवस्थां दूरीकर्तुं समभावना स्वीकार्या। शूद्रकस्य मृच्छकटिके नाटके दरिद्रोऽपि चारुदत्तः समभावनया सर्वेषां प्रेक्षकाणां हृदयमाकर्षयति।

"चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः"। इति प्रसिद्धम्।

जीवितं सदैव सुखदुःखसम्मिश्रं भवति। सम्पन्नस्य सुखिनः अपि जनस्य सम्पद्विनाशे कलत्रपुत्रबन्धुजनेभ्यः तिरस्कारः दृश्यते। दारिद्र्यं मरणादपि भयावहं मरणं दारिद्र्यादपि सुखावहम् इति च स्थाप्यते शूद्रकेण मृच्छकटिकनाटके।

सुखदुखयोः समभावनैव करणीया जीवितविजयाय इति सन्देशम् अध्यापिका कक्ष्यायामवतारयतु। तदधिकृत्य अभिमतानि क्रोडीकर्तुं छात्रान् प्रेरयतु च।

मृदा निर्मितं शकटं मृच्छकटम्।

तदाधिकृत्यकृत् नाटकं मृच्छकटिकम्

**कथापात्राणि**

१. चारुदत्तः - नायकः।

२. मैत्रेयः - विदूषकः।

## प्रथमोऽङ्कः

(ततः प्रविशति चारुदत्तः विदूषकश्च)

चारुदत्तः - अये सर्वकालमित्रं मैत्रेयः प्राप्तः।
सखे! स्वागतम्। आस्यताम्।

विदूषकः - यद् भवानाज्ञापयति। (उपविश्य) भो वयस्य! एष ते प्रियवयस्येन चूर्णवृद्धेन जातिकुसुमवासितः प्रावारकोऽनुप्रेषितः। सिद्धीकृतदेवकार्यस्यार्यचारुदत्तस्य त्वयोपनेतव्य इति। (समर्पयति)।

चारुदत्तः - (गृहीत्वा सचिन्तः स्थितः।)

विदूषकः - भोः किमिदं चिन्त्यते?

चारुदत्तः - वयस्य।

सुखं हि दुखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम्।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति।। १।।

---

**व्याख्या-**

सर्वकालमित्रम् - सन्मित्रम् (सुखे दुःखे च मित्रम्)
चूर्णवृद्धः - एतदाख्यः (चारुदत्तस्य मित्रम्)
प्रावारकः - उत्तरीयम्
जातिकुसुमवासितः - मालतीपुष्पेण सुरभीकृतः

**पदच्छेदः**

दुखान्यनुभूय - दुःखानि +अनुभूय
घनान्धकारेष्विव - घनान्धकारेषु +इव
सुखात्तु - सुखात् + तु

**विदूषकः** - **भो वयस्य मरणाद् दारिद्र्याद्वा कतरत् ते रोचते।**

**चारुदत्तः** - **वयस्य**

**दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम्।**

**अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम्।। २।।**

**विदूषकः** - **भो वयस्य अलं सन्तापितेन।**

**प्रणयिजनसंक्रामितविभवस्य सुरजनपीतशेषस्य**

---

**अन्वयः** - घनान्धकारेषु दीपदर्शनम् इव दुःखानि अनुभूय हि सुखं शोभते। यः नरः सुखात् दरिद्रतां याति सः शरीरेण धृतः अपि मृतः जीवति।

**सारः-** दुःखानुभवानन्तरं सुखं चेत् अधिकतया शोभते। अन्धकारेषु दीपदर्शनम् इव। यः नरः सुखं अनुभूय दुःखमनुभवति सः शरीरधार्यपि मृतः इव भवति।
"ते रोचते "इत्यत्र रुच्यर्थकधातोः योगात् चतुर्थी विभक्तिः । ते इति चतुर्थी।

**पदच्छेदः**

दारिद्र्यान्मरणाद्वा - दारिद्र्यात् +मरणात् + वा।

दारिद्र्यमनन्तकम्- दारिद्र्यम् +अनन्तकं।

**अन्वयः**- दारिद्र्यात् मरणात् वा मम मरणं रोचते। (यतः) मरणम् अल्पक्लेशं दारिद्र्यम् अनन्तकं दुःखं (अस्ति)।

**सारः**- दारिद्र्यात् मरणमेव श्रेष्ठमिति अहं मन्ये। हि मरणम् अल्पक्लेशं भवति। दारिद्र्यम् अनन्तं दुःखमेव।

सन्तापितेन - मनस्तापेन।

**प्रतिपच्चन्द्रस्येव परिक्षयोऽपि ते अधिकतरं रमणीयः।**

**चारुदत्तः - वयस्य न ममार्थान्प्रति दैन्यम्।**

**पश्य-**

**एतत्तु मां दहति यत् गृहमस्मदीयं**
**क्षीणार्थमित्यतिथयः परिवर्जयन्ति।**
**संशुष्कसान्द्रमदलेखमिव भ्रमन्तः**
**कालात्यये मधुकराः करिणः कपोलम्।।३।।**

---

प्रणयिजनसंक्रामितविभवस्य - प्रणयिजनेषु (आप्तलोकेषु) दयाधर्मादिना प्रदत्ताः, ऐश्वर्याणि येन तस्य ।

सुरजनपीतशेषस्य - सुरजनैः - देवैः

पीतशेषस्य - भुक्तावशिष्टस्य।

मम रोचते - (सम्बन्धमात्रविवक्षायां षष्ठी)

अलं सन्तापितेन इत्यत्र 'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका' इति वार्तिकेन साध्यभावद्योतनार्थे सन्तापितेन इति तृतिया

**पदच्छेदः**

ममार्थान्प्रति - मम +अर्थान् +प्रति

एतत्तु - एतत् +तु

गृहमस्मदीयं - गृहम् +अस्मदीयं

क्षीणार्थमित्यतिथयः - क्षीणार्थम् +इति + अतिथयः

संशुष्कसान्द्रमदलेखमिव - संशुष्कसान्द्रमदलेखम् + इव

**विदूषकः** - **भो वयस्य एते खलु दास्याः पुत्राः अर्थकल्पवर्ता वरटाभीता इव गोपालदारका अरण्ये यत्र यत्र न खाद्यन्ते तत्र तत्र गच्छन्ति।**

**चारुदत्तः** - **वयस्य!**

**सत्यं न मे विभवनाशकृतास्ति चिन्ता**
**भाग्यक्रमेण हि धनानि भवन्ति यान्ति।**
**एतत्तु मां दहति नष्टधनाश्रयस्य**
**यत् सौहृदादपि जनाः शिथिलीभवन्ति।।४।।**

**अपि च-**

**दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो**

---

**अन्वयः**- भ्रमन्तः मधुकराः कालात्यये संशुष्कसान्द्रमदलेखं करिणः कपोलम् इव अतिथयः क्षीणार्थम् इति यत् अस्मदीयं गृहं परिवर्जयन्ति एतत्तु मां दहति।

सारः- मम गृहं धनरहितम् इत्यतः अतिथयः त्यजन्ति इति कार्यं मां खेदयति। भ्रमराः मदजलरहितं गजकपोलं यथा त्यजन्ति तथैव।

**पदच्छेदः**

विभवनाशकृतास्ति - विभवनाशकृता + अस्ति
एतत्तु - एतत् + तु
सौहृदादपि - सौहृदाद् +अपि

**अन्वयः** - सत्यं मे विभवनाशकृता चिन्ता न अस्ति। हि धनानि भाग्यक्रमेण भवन्ति (तथा) यान्ति। तु एतत् मां दहति यत् जनाः नष्टधनाश्रयस्य सौहृदादपि शिथिलीभवन्ति।

**सारः-** विभवनाशः संभूतः इत्यनेन मम चिन्ता नास्ति। तद् सत्यमेव। हि धनानि भाग्यानुसारम् आयान्ति यान्ति च। किन्तु विनष्टधनस्य मम सौहार्दं जनाः त्यजन्ति। तद् मां दहति।

निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते।
निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते
निर्बुद्धिर्क्षयमेत्यहो निधनता सर्वपदामास्पदम्।। ५ ।।

**विदूषकः** - भो वयस्य! तमेव अर्थकल्यवर्तं स्मृत्वा अलं सन्तापितेन।

**चारुदत्तः** - वयस्य! दारिद्र्यं हि पुरुषस्य-

निवासश्चिन्तायाः परपरिभवो वैरमपरं
जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम्।
वनं गन्तुं बुद्धिर्भवति च कलत्रात्परिभवो
हृदिस्थः शोकाग्निर्न दहति सन्तापयति च।। ६।।

---

अमी दास्याः पुत्राः- एते सेविकायाः पुत्राः। निन्दां सूचयति। अर्थकल्यवर्ताः- प्रातराशाः। अर्थाः धनानि एव कल्यवर्ताः- अर्थकल्यवर्ताः। वरटाभीताः - वरटा नाम दंशनकारिणी कीटाविशेषः ताभिः भीताः त्रस्ताः। गोपालदारकाः- गोपालबालकाः।

**पदच्छेदः**

दारिद्र्याद्ध्रियमेति - दारिद्र्यात् +ह्रियम्+ एति
परिभवान्निर्वेदमापद्यते - परिभवात् +् निर्वेदम् +आपद्यते
शुचमेति - शुचम् + एति
क्षयमेत्यहो - क्षयम् +एति +अहो
सर्वापदामास्पदम् - सर्वापदाम् +आस्पदम्

**अन्वयः-** दारिद्र्याद् ह्रियम् एति, ह्रीपरिगतः तेजसः प्रभ्रश्यते, निस्तेजाः परिभूयते परिभवात् निर्वेदम् आपद्यते, निर्विण्णः शुचम् एति, शोकपिहितः बुद्ध्या परित्यज्यते, निर्बुद्धिः क्षयं एति । अहो निधनता सर्वपदाम् आस्पदम्।

**तद्वयस्य कृतो मया गृहदेवताभ्यो बलिः। गच्छ, त्वमपि चतुष्पथे मातृभ्यो बलिमुपहर।**

**विदूषकः - यत एवं पूज्यमाना अपि देवता न ते प्रसीदन्ति। तत् को गुणो देवेष्वर्चितेषु।**

**चारुदत्तः - वयस्य! मा मैवम्। गृहस्थस्य नित्योऽयं विधिः।**
**तपसा मनसा वाग्भिः पूजिता बलिकर्मभिः।**
**तुष्यन्ति शमिनां नित्यं देवताः किं विचारितैः।।७।।**
**तद्गच्छ मातृभ्यो बलिमुपहर।**

---

सारः- निर्धनत्वं सर्वासां विपदां कारणमेव। हि दारिद्र्यात् लज्जां प्राप्नोति लज्जितस्य तेजोनाशः। तेजोरहितः अपमानितः भवेत्। अपमानात् ग्लानिर्जायते। ग्लानियुक्तः शोकं प्राप्नोति। शोकेन व्याकुलः बुद्धिं त्यजति। बुद्धिहीनः विनाशं प्राप्नोति। अतः निर्धनता सर्वेषां दुःखानां कारणं भवति।

**पदच्छेदः**

निवासश्चिन्तायाः - निवासः + चिन्तायाः
वैरमपरं - वैरम् +अपरम्
बुद्धिर्भवति - बुद्धिः +भवति
कलत्रात्परिभवो - कलत्रात् + परिभवो
शोकाग्निर्न - शोकाग्निः +न

**अन्वयः -** चिन्तायाः निवासः, परपरिभवः, अपरं वैरं, मित्राणां जुगुप्सा, स्वजनजनविद्वेषकरणम् च । कलत्रात् परिभवः, वनं गन्तुं बुद्धिः च भवति । हृदिस्थः शोकाग्निः न दहति सन्तापयति च।

**विदूषकः - भो! न गमिष्याम्यन्यः कोऽपि प्रयुज्यताम्। मम पुनर्ब्राह्मणस्य सर्वमेव विपरीतं परिणमति। आदर्शगतेव छाया वामतो दक्षिणा दक्षिणातो वामा। अन्यच्चैतस्यां प्रदोषवेलायामिह राजमार्गे गणिका विटाश्चेष्टा राजवल्लभाश्च पुरुषाः संचरन्ति। तस्मान्मण्डूकलुब्धस्य कालसर्पस्य मूषिक इवाभिमुखापतितो वध्य इदानीं भविष्यामि। त्वमिहोपविष्टः किं करिष्यसि।**

**चारुदत्तः - भवतु! तिष्ठ तावत्। अहं समाधिं निर्वर्तयामि।**

---

**सारः**- दारिद्र्यम् पुरुषस्य चिन्तायाः निवासः। अन्येन कृतमपमानं शत्रुतां जनयति। सुहृदां जुगुप्सा। सुहृदःपरित्यजन्ति। स्वबान्धवानाम् इतरेषां जनानां च विद्वेषकारणम्। भार्यायाः सकाशादपि परिभवः जायते। सर्वमुपेक्ष्य वनं गन्तुम् इच्छा जायते। हृदयस्थितः शोकाग्निः न दहति सन्तापयति च। अतः दारिद्र्यं मानवं खेदयति।

चतुष्पथे-श्रृंगाटके

बलिमुपहर- गृहस्थस्य नित्योऽयं विधिः "सायं प्रातः वैश्यदेव! कर्तव्यो बलिकर्म च। अनश्नतापि सततमन्यथा किल्बिषं भवेत्" इति धर्मशास्त्रोक्तदृष्ट्या अवश्यानुष्टेयं कर्म।

**पदच्छेदः**

गमिष्याम्यन्यः - गमिष्यामि +अन्यः।

इहोपविष्टः - इह +उपविष्टः।

**अन्वयः**- शमिनां मनसा वाग्भिः बलिकर्मभिः च पूजिताः देवता; नित्यं तुष्यन्ति। विचारितैः किम्?

**सारः**- तपश्चरणेन चित्तेन स्तुतिरूपाभिः वाग्भिः बलिकर्मभिः च देवताः नित्यं पूजिताः चेत् सन्तुष्यन्ति। (तपसा) मनसा वाग्भिः बलिकर्मभिः च देवगणान् नित्यं अर्चयन्ति चेत् ते देवगणाः सन्तुष्यन्ति। अस्मिन् विषये तर्कवितर्कस्य आवश्यकता नास्ति।



# पठनप्रवर्तनानि

**१.दशरूपकाणि अधिकृत्य संघचर्चां करोतु।**

श्रद्धेयाः अंशाः।

- आशयापग्रथनम्।
- चर्चाचालनम्।
- क्रोडीकरणम्।

**२.रूपकं पठित्वा आशयं कथारूपेण परिवर्त्य लिखत।**

श्रद्धेयाः अंशाः।

- रूपकापग्रथनम्।
- कथारूपेण परिवर्तनम्।
- कथालेखनम्।

**३.रूपकमिदं कक्ष्यायम् अवतारयतु।**

श्रद्धेयाः अंशाः।

- नाटकवाचनम्।
- आशयावगमनम्।
- नाटकावतरणम्।



# अभ्यासः

१. **विग्रहवाक्यलेखनम्।**

**श्रद्धेयाः अंशाः।**

- विग्रहयुक्तपदचयनम्।
- विग्रहलेखनम्।
- पट्टिकाकरणम्।

२. **अधोनिर्दिष्टान् कथास्तम्भान् पाठभागानुसारं क्रमीकुरुत।**

**उपगम्य गुरुकुलं स कुमारः अतीतं सर्वं वृत्तान्तम् अश्रावयत्।**

**गुरुदक्षिणां दत्वा राजधानीं प्रतिन्यवर्तत।**

**यदा अजानां संख्या सहस्राधिकम् उपेष्यति तदा प्रत्यागच्छतु।**

**कौतुकेन हेतुना अजानां गणनां कृतवान्।**

**लोकज्ञस्य मनःशास्त्रनिपुणस्य महीपतेः मुखं म्लानं अभवत्।**

**श्रद्धेयाः अंशाः।**

- आशयावगमनम्।
- क्रमीकरणम्।
- कथास्तम्भलेखनम्।

**३.गुरुकुलात् प्रतिनिवृत्तस्य पुत्रस्य पितुः च मिथः भाषणं संभाव्य लिखत।**

**श्रद्धेयाः अंशाः।**

•आशयावगमनम्।

•क्रमीकरणम्।

•संभाषणलेखनम्।

**४. पितुस्सकाशात् प्रतिनिवृत्तस्य श्वेतकेतोः गुरोः च मिथः सम्भाषणं सम्भाव्य लिखत।**

**श्रद्धेयाः अंशाः।**

•आशयावगमनम्।

•क्रमीकरणम्।

•संभाषणलेखनम्।

**५. आधुनिकविद्याभ्यासः प्रयोगिकतायाम् अधिष्ठितं भवति। संवादं चालयतु।**

**श्रद्धेयाः अंशाः।**

•आशयापग्रथनम्।

•संवादचालनम्।

•क्रोडीकरणम्।

**६. पाठभागात् सन्धियुक्तपदानि चित्वा तेषां सन्धिविच्छेदं कुरुत।**

**श्रद्धेयाः अंशाः।**

- सन्धियुक्तपदचयनम्।
- सन्धिविच्छेदः।
- क्रोडीकरणम्।

**७. चारुदत्तस्य दारिद्र्यं दृष्ट्वा भवद्भिः किमनुभूयते- अत्र चर्चा क्रियताम्।**

**श्रद्धेयाः अंशाः।**

- नाटकवाचनम्।
- आशयावगमनम्।
- क्रोडीकरणम्।

**८. स्वभावनिरूपणं कुरुत।**

१. चारुदत्तः।

२. मैत्रेयः।

३. शूद्रकः।

**९. टिप्पणीर्लिखत।**

१.चारुदत्तस्य स्वभावं विशदयत।

२ चारुदत्तमैत्रेययोः सम्भाषणम्।

**१०. गुरुसन्निधिमात्रेण शिष्यज्ञानं प्रकाशयेत्।**
**रविसन्निधिमात्रेण सूर्यकान्तं प्रदीपयेत्।।**

इति सुभाषितस्य

आचार्यात् पादमादत्ते, पादं शिष्यस्स्वमेधया।
पादं सब्रह्मचारिभ्यो, पादं कालक्रमेण च।। इति श्लोकस्य च तारतम्यं कुरुत।

## किमधिगतम् ?


**पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं(√) करोतु।**

| क्रमसंख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः |
| --- | --- | --- | --- | --- |
| १. | कथावतरणम् | | | |
| २. | कथास्तम्भक्रमीकरणम्। | | | |
| ३. | सम्भाव्यलेखनम्। | | | |
| ४. | टिप्पणीलेखनम् | | | |
| ५. | पट्टिकाकरणम् | | | |
| ६. | संवादचालनम् | | | |
| ७. | नूतनपदचयनम् | | | |
| ८. | सन्धिच्छेदः | | | |
| ९. | समासः | | | |
| १०. | अन्वयः | | | |
| ११. | चम्पूप्रभाषणा-वतरणम् | | | |
| १२. | आशयलेखनम् | | | |

## किमधिगतम् ?

**पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं(√) करोतु।**

| क्रम | प्रवर्तनानि | पूर्णतया | भागिकतया | अल्पतया |
|---|---|---|---|---|
| १. | अहम् अध्यापकानां वचांसि सश्रद्धं श्रृणोमि। | | | |
| २. | प्रतिकूलेऽपि साहचर्ये याथार्थ्यं वदामि। | | | |
| ३. | अन्येषां कष्टावसरे साहाय्यं करोमि। | | | |
| ४. | कार्याणि आवश्यानुसारं कर्तुं प्रयत्नं करोमि। | | | |
| ५. | नूतनान् विषयान् ज्ञातुं प्रयत्नं करोमि। | | | |
| ६. | लक्ष्यप्राप्त्यर्थं पुनःपुनः प्रयत्नं करोमि। | | | |
| ७. | समयानुसारं वक्तुं प्रयत्नं करोमि। | | | |
| ८. | अन्यान् प्रति सस्नेहं सम्भाषणाय प्रयत्नं करोमि। | | | |
| ९. | अन्येषां सर्गात्मकगुणान् अङ्गीकरोमि आस्वादयामि च। | | | |
| १०. | अन्येषाम् उपकारप्रदानि कार्याणि कर्तुं प्रयत्नं करोमि। | | | |




# एककम्- ३



# स्वतन्त्रता

## एककम्-३

# स्वतन्त्रता



### आमुखम्

केरलीयमहाकविषु अन्यतमः भवति मुतुकुलं श्रीधरः। आलप्पुषजिल्लायां चेन्नित्तलवासिनां तेषां 'नवभारतम्' महाकाव्यं आधुनिकसंस्कृतसाहित्ये उन्नतं स्थानम् अलङ्करोति। तेन राष्ट्रीयान्दोलनस्य स्वतन्त्रतासंग्रामस्य च चरितम् उपजीव्य नवभारतम् इति महाकाव्यं रचितम्। स्वातन्त्र्यसमरभटानां परिश्रमफलरूपया स्वातन्त्र्यलब्ध्या सह काव्यं परिसमापयति। काव्येऽस्मिन् आफ्रिकादेशे महात्मागान्धिनः संघटनाप्रवर्तनस्य चरितवर्णनं यत् तदेवात्र पाठरूपेण स्वीकृतम्। नियमपठनार्थं गान्धिवर्यस्य दक्षिणाफ्रिकागमनं तत्र भारतीयैः अनुभूयमानानां समस्यानां परिहारार्थं प्रयत्नः च तत्र पञ्चमसर्गे सुमनोहरं विवृतः दृश्यते।

अस्य महाकाव्यस्य पञ्चमसर्गे करंचन्द्गान्धिनः पुत्ररूपेण सुदामपुर्यां महात्मागान्धिनः जननम् लण्डन्नगरे विद्याभ्यासः तदनन्तरं दक्षिणक्रौञ्चदेशे व्यवहारोपदेष्टृरूपेण कार्यकरणं च प्रथमं वर्णयति। तत्र वर्णविवेचनेन पीडितानां प्रवासिनां भारतीयानां संघाटने तेषाम् उद्बोधने च बद्धश्रद्धः गान्धिः एवमभाषत।

रवीन्द्रनाथटागोर् महाशयस्य गीताञ्जलिः नाम ग्रन्थः भारते सर्वत्र प्रसिद्धमेव। तस्य संस्कृत परिभाषा प्रो.एन. गोपालपिल्ला महोदयेन विहिता। तस्मादुद्धृतः अंशोऽपि एककेऽस्मिन् समायोजितः।



## पठनाधिगमाः

महितामृतम्

- काव्यं कवीं चाधिकृत्य टिप्पणीं लिखति।
- श्लोकानां गद्ययक्रमं लिखति।
- श्लोकानाम् अस्वादनटीकां लिखति।
- स्वातन्त्र्यमधिकृत्य चर्चते।
- गीतम् आलपति।
- गीताञ्जलिमधिकृत्य प्रभाषणं करोति।

# ३.१
# महितामृतम्



## प्रवेशकः

प्रायोगिकज्ञानपूर्वकं शास्त्रज्ञानं जनान् स्वतन्त्रतां नयति। व्यक्तेः राष्ट्रस्य च स्वातन्त्र्यम् अत्र विवक्षितम्। तद्द्योतकं गीतकांशं च एककेऽस्मिन् प्रस्तौति।

**स्वातन्त्र्यमेव पीयूषम्**
**स्वातन्त्र्यमेव जीवितम्।**
**पारतन्त्र्यं मानिनान्तु**
**मृत्योरपि भयानकम्।।**

| | | |
|---|---|---|
| आचार्यः | - | अयि बालके!किमिदं पञ्जरे स्थितम्? |
| बालिका | - | गुरो! इयं शुकी। सुन्दरी खलु? |
| आचार्यः | - | आम्! सुन्दरी एव। |
| बालिका | - | एषा सुन्दरी समर्था वार्तालापमपि करोति। |
| आचार्यः | - | एवं वा? किं वदत्येषा? |
| बालिका | - | एषा मम नाम वदति। सर्वान् कुशलं पृच्छति। |
| आचार्यः | - | एवं वा? किन्तु सा सन्तुष्टा वा। |
| बालिका | - | भवता किमुद्दिष्टम्। |
| आचार्यः | - | अयि! एष शुकी आकाशे स्वतन्त्रतया डयनाय इच्छति।<br>**सुन्दरकाञ्चनपञ्जरबन्धोऽपि।**<br>**बन्धनं बन्धनमेव लोके ।।** अतः तां मोचयतु। |
| बालिका | - | सत्यं गुरो! तथा करोमि।<br>(पञ्जरम् उद्घाट्य शुकीं मोचयति।) |

१. **यत्र वर्णपरिचिन्तनचण्डाः**
**प्रस्तृतासितविमर्दनदण्डाः।**
**निस्त्रपं सितिमभावितगोत्राः**
**वृद्धिमापुरतुलां सितगात्राः।।**

**पदच्छेदः-** यत्र वर्णपरिचिन्तनचण्डाः प्रस्तृतासितविमर्दनदण्डाः निस्त्रपं सितिमभावितगोत्राः वृद्धिम् आपुः अतुलां सितगात्राः।

| अन्वयः | | अर्थः |
|---|---|---|
| यत्र | - | दक्षिणक्रौञ्चद्वीपे |
| वर्णपरिचिन्तनचण्डाः | - | वर्णचिन्तनविषये क्रूराः |
| प्रस्तृतासितविमर्दनदण्डाः | - | असंघटितानाम् असितानां दण्डनदातारः |
| निस्त्रपम् | - | निर्लज्जम् |
| सितिमभावितगोत्राः | - | श्वेतवर्णेन गर्वितगोत्राः |

सितगात्राः - श्वेतवर्णयुक्ताः जनाः
अतुलां वृद्धिं - असदृशाम् अभिवृद्धिम्
आपुः - प्रापुः।

**आशयः**

दक्षिणाफ्रिक्कादेशे सितगात्राः शरीरवर्णविवेचनयुक्ताः आसन्। लज्जाविहीनाः ते कृष्णवर्णयुक्तान् जनान् क्रूरं पीडयन्तः असदृशाम् अभिवृद्धिं प्रापुः।

**विग्रहः** वर्णपरिचिन्तनचण्डाः - वर्णानां परिचिन्तनं, तस्मिन् वर्णपरिचिन्तने, चण्डाः।
प्रस्तृतासितविमर्दनदण्डाः - प्रस्तृतानाम् असितानां विमर्दनानि यस्मिन् कर्मणि तदेव दण्डं येषां ते।
सितिमभावितगोत्राः - सितिम्ना भावितं गोत्रं येषां ते।
निस्त्रपम् - निर्गता त्रपा यस्मिन् कर्मणि तद्यथा।
सितगात्राः - सितानि गात्राणि येषां ते।

**वृत्तम्** स्वागता- स्वागतेति रनभाद्गुरुयुग्मम्।

**क्रिया-** आपुः। आप्लृ गतौ- पर लिट् प्र.पु.-ब.व.। आप, आपतुः, आपुः।

२. **एवमादिषु कदर्थितचित्तो**
**मेलयन्निजजनानतिदीनान्।**
**व्याजहार परिहारदिदृक्षुः**
**साभिमानमभिमानधुरीणः।।**

**पदच्छेदः**

एवम् आदिषु कदर्थितचित्तः मेलयन् निजजनान् अतिदीनान् व्याजहार परिहारदिदृक्षुः साभिमानम् अभिमानधुरीणः।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| एवमादिषु | - | एवंविधकार्येषु |
| कदर्थितचित्तः | - | पीडितहृदयः |
| अभिमानधुरीणः | - | अभिमानिषु अग्रगण्यः (सः गान्धिः) |
| परिहारदिदृक्षुः | - | परिहारं द्रष्टुम् इच्छुः |
| अतिदीनान् | - | अतिदुःखितान् |
| निजजनान् | - | स्वबान्धवान् भारतीयान् |
| मेलयन् | - | एकत्र संघाटयन् (आनयन्) |
| साभिमानं | - | अभिमानेन सह |
| व्याजहार | - | उवाच। |

**सारः**

एवं वर्णविवेचनविषये दुःखितः अभिमानी गान्धिमहाभागः पीडन परिहारार्थं स्वबान्धवान् भारतीयान् एकत्र संघीकृत्य साभिमानमेवम् उवाच।

| | | | |
|---|---|---|---|
| **विग्रहः** | कदर्थितचित्तः | - | कदर्थितं चित्तं यस्य सः। |
| | परिहारदिदृक्षुः | - | द्रष्टुम् इच्छुः दिदृक्षुः, परिहारं दिदृक्षुः। |
| | अभिमानधुरीणः | - | अभिमानिषु धुरीणः। |
| | साभिमानम् | - | अभिमानेन सह वर्तते यस्मिन् कर्मणि तद्यथा। |
| **क्रिया** | व्याजहार | - | वि आ जहार।<br>हृ हरणे धातोः लिट्, पर.प. प्र. पु.ए.व।<br>जहार जह्रतुः जह्रुः। |

**३. मान्यभारतजनाः श्रृणुतेमां**
**वाचमन्यभुवि वृत्तिमुपेत्य।**
**कृष्णवर्णविहितात्मविकारा-**
**स्तर्जिताः सितगणैरिति कष्टम्।।**

**पदच्छेदः**

मान्यभारतजनाः श्रृणुत इमां वाचम् अन्यभुवि वृत्तिम् उपेत्य कृष्णवर्णविहितात्मविकाराः तर्जिताः सितगणैः इति कष्टम्।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| मान्यभारतजनाः! | - | हे मान्याः भारतीयाः! |
| इमां वाचम् | - | इमां मदुदीरितं वाक्यम् |
| श्रृणुत | - | आकर्णयत |
| अन्यभुवि | - | विदेशे |
| वृत्तिम् उपेत्य | - | जीविकाम् प्राप्य |
| कृष्णवर्णविहितात्मविकाराः | - | कृष्णवर्णेन विहिताः आत्मविकाराः येषां ते। (वयं) |
| सितगणैः | - | श्वेतवर्णयुक्तैः जनैः |
| तर्जिताः | - | तिरस्कृताः |
| इति कष्टम् | - | इत्येतद् दयनीयम् इत्यर्थः। |

**सारः-** हे अभिमानिनः भारतीयाः! मम वाक्यं श्रृण्वन्तु। अन्यदेशे जीवनोपाधिमन्विष्य आगताः वयं श्वेतवर्णीयैः तिरस्कृताः इतीयं दशा कष्ट एव भवति।

**विग्रहः** कृष्णवर्णेन विहितं आत्मविकारं येषां ते कृष्णवर्णविहितात्मविकाराः।

**क्रिया-** श्रृणुत। श्रु श्रवणे- पर लोट् म. पु ब. व.।

श्रृणु, श्रणुतात् श्रृणुतम् श्रृणुत।

४. **यूयमद्य परिचिन्तयतैताः**
**स्वा दशाः परनिपेषशरव्याः।**
**द्राग्जहीतपरवत्वकठोरं**
**स्वात्ममानहननादसमत्वम्।।**

**पदच्छेदः**

यूयम् अद्य परिचिन्तयत एताः स्वाः दशाः परनिपेषशरव्याः द्राक्जहीत परवत्वकठोरं स्वात्ममानहननात् असमत्वम्।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अद्य | - | इदानीम् |
| यूयं | - | बान्धवाः |
| एताः परनिपेषशरव्याः दशाः | - | स्वकीयां परपीडिताम् अवस्थां-(अन्यैः क्रियमाणोपद्रवं) |
| परिचिन्तयत | - | विचिन्तनं कुरुत। |
| स्वात्ममानहननात् | - | आत्मानः अभिमानध्वंसनात्। |
| परवत्वकठोरं | - | पारतन्त्र्येण उग्रम्। |
| असमत्वम् | - | उच्चनीचत्वम्। |
| द्राग्जहीत | - | द्रुतं त्यजत।। |

**सारः**- श्वेतवर्णीयैः पीडिताः यूयं स्वकीयां अवस्थां परिचिन्तयत। आत्माभिमाननाशकं पारतन्त्र्यसहितम् उच्चनीचत्वं द्रुतमेव त्यजत।

**विग्रहः-** परनिपेषशरव्याः- परेषां निपेषस्य शरव्याः परनिपेषशरव्याः।
शरस्य योग्याः शरव्याः।

स्वात्ममानहननात् - स्वात्ममानस्य हननम् स्वात्ममानहननं, तस्मात् स्वात्ममानहननात्।

५. **भारताः वयमुदञ्चितधैर्यं**
**व्यूहमाप्य परिपन्थिजनेभ्यः।**
**मोक्तुमात्मगुणपुष्टि यतध्वम्**
**कीर्तिरेव मनुजेष्वभिकाम्या।।**

**पदच्छेदः-**

भारताः वयं उदञ्चितधैर्यं व्यूहम् आप्य परिपन्थिजनेभ्यः मोक्तुम् आत्मगुणपुष्टि यतध्वम्, कीर्तिः एव मनुजेषु अभिकाम्या।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| भारताः वयं | - | भारतजनाः वयं |
| उदञ्चितधैर्यम् | - | संवर्धितधैर्यं |
| व्यूहम् आप्य | - | राशीभूय |
| परिपन्थिजनेभ्यः | - | शत्रुभ्यः |
| मोक्तुं | - | मोचयितुम् |
| आत्मगुणपुष्टि | - | स्वगुणानां पोषः यथा तथा (आत्मगुणपुष्ठ्यर्थं) |
| यतध्वम् | - | प्रयत्नं कुरुत |
| कीर्तिः एव | - | यशः एव |
| मनुजेषु | - | मानवेषु |
| अभिकाम्या | - | अभिलषणीया। |

**सारः**- अस्माभिः सधैर्यं संघीभूय मोचनाय प्रयत्नः कार्यः।
सत्कीर्तिः एव सर्वैः अभिलषणीया।

**विग्रहः** उदञ्चितधैर्यं - उदञ्चितं धैर्यं यस्मिन् कर्मणि तथा।
आत्मगुणपुष्टि - आत्मनः गुणानां पुष्टिः यस्मिन् कर्मणि तथा।

**क्रिया** - यतध्वम्। यती प्रयत्ने आत्म. प.- लोट् म.पु ब. व.।
यतस्व यतेथाम् यतध्वम्

६.    **वाहने स्थलजले दिवि दिक्षु**
**स्थापनेऽपि च वयं हि निपिष्टाः।**
**वर्णगर्वितसितैरपि धाष्टर्यम्**
**खण्ड्यतेऽस्मदभिजातमहत्वम्।।**

**पदच्छेदः** वाहने स्थलजले दिवि दिक्षु स्थापने अपि च वयं हि निपिष्टाः वर्णगर्वितसितैः अपि धाष्टर्यं खण्ड्यते अस्मद् अभिजातमहत्वम्।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| वयं हि | - | वयं भारतीयाः हि |
| वाहने | - | याने |
| स्थलजले | - | स्थले जले च |
| दिवि दिक्षु | - | आकाशे आशासु च |
| स्थापने अपि | - | कार्यालये अपि |
| वर्णगर्वितसितैः | - | श्वेतवर्णेन गर्वितैः सितगात्रैः |
| निपिष्टाः | - | निपीडिताः |
| अस्मदभिजातमहत्वम् | - | अस्माकं कुलमहिमानं |
| धाष्टर्यम् | - | प्रागल्भ्यं(च) |
| खण्ड्यते | - | छिद्यते। |

**सारः-** वयं भारतीयाः याने स्थले जले दिक्षु कार्यालये सर्वत्रापि श्वेतवर्णीयैः हूणैः निपीडिताः । एवम् अस्माकं महत्वं प्रागल्भ्यं च तैः खण्ड्यते।

**विग्रहः-** वर्णे गर्विताः च सिताः च वर्णगर्वितसिताः, तैः वर्णगर्वितसितैः।

**क्रिया-** खण्ड्यते- खण्ड छेदने कर्मणि आत्मनेपदी लट् प्र.पु ए.व.।
खण्ड्यते, खण्ड्येते, खण्ड्यन्ते।

७. पान्थवेश्मनि च भोजनगेहे
पार्थवर्णरहितत्वमुपेताः।
कीर्तनीयगुणिनो वयमार्ताः
मूर्तिमत्वमथवा किमु गर्ह्यम्॥

**पदच्छेदः**

पान्थवेश्मनि च भोजनगेहे पार्थवर्णरहितत्वम् उपेताः कीर्तनीयगुणिनः वयम् आर्ताः मूर्तिमत्वम् अथवा किमु गर्ह्यम्।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| पान्थवेश्मनि | - | पथिकानां विश्रमकेन्द्रे |
| भोजनगेहे च | - | भक्ष्यशालायाम् |
| पार्थवर्णरहितत्वमुपेताः | - | सितवर्णरहिताः ताः |
| कीर्तनीयगुणिनः | - | सद्गुणसम्पन्नाः |
| वयं | - | भारतीयाः |
| आर्ताः | - | दुःखिताः |
| अथवा | - | वा |
| मूर्तिमत्वं | - | शरीरत्वम् |
| गर्ह्यं किम् | - | गर्हणीयं किम्? |

**सारः** पान्थानां विश्रमकेन्द्रे भोजनशालायां असिताः सद्गुणसम्पन्नाः वयं भारतीयाः तिरस्कृताः दुःखिताश्च। शरीरत्वं निन्द्यं किम्? अनिन्द्यम् एव इति भावः।

**विग्रहः-** पान्थानां वेश्म पान्थवेश्म, तस्मिन् पान्थवेश्मनि।
कीर्तनीयाः गुणाः येषां ते कीर्तनीयगुणिनः।

८. **मानुषेषु नियतोऽप्यवकाशो**
**नो निषिध्यत इति क्रमभंगः।**
**अस्मदीयजनविह्वलतां तां**
**श्रोतुमत्र बधिराः इव कर्णाः।।**

**पदच्छेदः**

मानुषेषु नियतः अपि अवकाशः नः निषिध्यते इति क्रमभंगः अस्मदीयजनविह्वलतां तां श्रोतुम् अत्र बधिराः इव कर्णाः।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| मानुषेषु | - | मनुजेषु |
| अवकाशः | - | अवसरः |
| नियतः अपि | - | निश्चितः अपि |
| नः निषिध्यते | - | अस्माकं (अवसरः) अपवार्यते इति |
| क्रमभंगः | - | समीचीना रीतिः न |
| तां अस्मदीयजनविह्वलता | - | भारतीयजनानाम् एतादृशीम् आकुलुताम् |
| श्रोतुम् | - | अवगन्तुम्। |
| अत्र | - | क्रौञ्चद्वीपे। |
| बधिराः इव कर्णाः | - | शब्दग्रहणासमर्थानि इव श्रोत्राणि। (श्रोतुं न कोऽप्यस्ति) |

**सारः** सर्वेषां जनानां अवकाशः निश्चितः अस्ति। अस्माकं भारतीयानाम् अवकाशः निषिध्यते इति कार्यं समीचीनं नास्ति। अस्माकं दुःखान् श्रोतुम् अत्र सर्वेषां कर्णाः बधिराः इव प्रतिभान्ति।

**विग्रहः** अस्माकं इदं अस्मदीयम्।

अस्मदीयश्च ते जनाः अस्मदीयजनाः, तेषां विह्वलता अस्मदीयजनविह्वलता, ताम् अस्मदीयजनविह्वलताम्।

९. **तत्प्रभूय सुदृढास्तु भवन्तो**
**व्यग्रतां दधतु पिण्डितयूथाः।**
**अक्रमावसितये निजनिघ्नाः**
**प्रत्यवायभिदुराश्च भवन्तु।।**

**पदच्छेदः-** तत् प्रभूय सुदृढाः तु भवन्तः व्यग्रतां दधतु पिण्डितयूथाः अक्रमावसितये निजनिघ्नाः प्रत्यवायभिदुराः च भवन्तु।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| तत् प्रभूय | - | तस्मात् संभूय |
| सुदृढाः | - | सुशक्ताः |
| पिण्डितयूथाः | - | संघीभूय |
| व्यग्रतां दधतु | - | व्यग्राः भवन्तु |
| अक्रमावसितये | - | अक्रमं समापयितुम् |
| निजनिघ्नाः | - | निजायत्ताः (स्वार्जिताः) |
| प्रत्यवायभिदुराः | - | विघ्नविच्छेदकाश्च |
| भवन्तु | - | प्रभवन्तु। |

**सारः-** तस्मात् सर्वे सुशक्ताः संघीभूय श्रद्धायुक्ताः भवन्तु। विद्रोहशमनार्थं स्वशक्त्या विघ्नभेदकाः च भवन्तु।

**क्रिया -** दधतु - हुधाञ् धारणे-पर-लोट्-मपु-ब.।व
दधातु, धत्ताम्, दधतु।

**१०. एवमादिभिरनर्घवचोभि-**
**श्चोदयन्निजजनान्बहुधासौ।**
**मोहनः प्रकृतिमोहनवाचं**
**संजहार महितामृतलक्ष्यः॥**

**पदच्छेदः**

एवम् आदिभिः अनर्घवचोभिः चोदयन् निजजनान् बहुधा असौ मोहनः प्रकृतिमोहनवाचं संजहार महितामृतलक्ष्यः।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| महितामृतलक्ष्यः | - | महत्वपूर्णलक्ष्यसहितः |
| असौ मोहनः | - | वश्यवाक् (गान्धिः) |
| एवमादिभिः | - | एवं प्रकारैः |
| अनर्घवचोभिः | - | अमूल्यवचनैः |
| निजजनान् | - | स्वजनान् भारतीयान् |
| बहुधा | - | बहुप्रकारेण |
| चोदयन् | - | प्रेरयन् |
| प्रकृतिमोहनवाचं | - | प्रकृत्या एव सुन्दरं वाचम् |
| संजहार | - | नियमितवान्। |

**सारः -** एतादृशैः सुन्दरवचोभिः स्वदेशीयान् संघटनायै उत्प्रेरयन् महालक्ष्यवान् स गान्धिः विरतवागासीत्।

**विग्रहः** महितामृतलक्ष्यः-महितम् अमृतं च लक्ष्यं यस्य सः।
अनर्घवचोभिः - न अर्घं अनर्घम्, अनर्घैः वचोभिः अनर्घवचोभिः।
प्रकृतिमोहनवाचं - प्रकृत्या मोहना वाक् प्रकृतिमोहनवाक्, तां।

**क्रियाः-** संजहार - सम् पूर्वक हृञ् धातुः प.प. लिट् प्र. पु. ए. व.।
संजहार - संजह्रतुः - संजह्रुः।



# पठनप्रवर्तनानि

१. **काव्यं कक्ष्यायाम् आलपतु।**

श्रद्धेयाः अंशाः।

- अक्षरव्यक्तिः।
- सतालालपनम्।
- अर्थबोधः।

२. **नूतनपदचयनं कृत्वा शब्दकोशे निवेशयतु।**


श्रद्धेयाः अंशाः।

- नूतनपदानां चयनम्।
- अर्थनिर्धारणम्।
- पदकोशनिवेशनम्।

३. **सन्धिच्छेदं कृत्वा कोशे निवेशयतु।**

श्रद्धेयाः अंशाः।

- सन्धियुक्तपदचयनम्।
- सन्धिविश्लेषणम्।
- संश्लिष्टपदकोशे निवेशनम्।



३.२

# शक्तिं देहि।



## प्रवेशकः

कविसार्वभौमस्य टागोर्महाशयस्य गीताञ्जलिः इति काव्यं विश्वविख्यातमेव। एतत् काव्यम् आधारीकृत्य स नोबल् पुरस्कारेण सम्मानितः इत्यनेन अस्य काव्यस्य माहात्म्यं स्पष्टं भवति। अनेकभाषासु अस्य काव्यस्य अनुवादाः कृताः दृश्यन्ते। संस्कृतभाषायामपि अस्य केचन अनुवादाः सन्ति। प्रो.एन् गोपालपिल्ला महोदयेन कृतात् संस्कृतानुवादग्रन्थात् गीतद्वयम् अत्र स्वीकृतम्। मानवस्य स्वातन्त्र्यम् अभिमानं च जागर्तुम् गीतद्वयमिदं साहायकं प्रेरकं च भवति।

१. **यत्र विनिर्भयमुदयति हृदयं**
**यत्रोदात्तो मूर्धोदेति।**
**यत्र प्रसरति परितो ज्ञानं**
**परमं स्वातन्त्र्यं विदधानम्।।**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| यत्र | - | यस्मिन् देशे |
| हृदयं | - | मनः |
| विनिर्भयं | - | भयरहितम् |
| उदयति | - | प्रत्यक्षीभवति |
| यत्र | - | यस्मिन् देशे |
| मूर्धा | - | शिरः |
| उदात्तः | - | उत्कृष्टः |
| उदेति | - | प्रत्यक्षीभवति |
| यत्र | - | यस्मिन् देशे |
| परमं | - | श्रेष्ठम् |
| स्वातन्त्र्यं | - | स्वतन्त्रतायाः भावः |
| विदधानं | - | दानं कुर्वन्तं |
| ज्ञानं | - | विज्ञानम् |
| परितः | - | समन्तात् |
| प्रसरति | - | व्याप्नोति। |

**सारः-** यत्र मनसः निर्भयत्वं स्वातन्त्र्यं च स्तः तत्र विज्ञानस्य प्रसरः वर्तते (तादृश्यां चिन्तायां मम मनः जागर्तु शक्तं कुरु।)

२.  **सङ्कुचिताभिर्गृहभित्तिभिरपि**
**यत्र न भिन्नं छिन्नं भुवनम्।**
**यत्र प्रादुःषन्ति च वाचः।**
**परमार्थस्यागाधगुहातः।।**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| यत्र | - | यस्मिन् देशे |
| सङ्कुचिताभिः | - | अल्पस्थलाभिः |
| गृहभित्तिभिः | - | भवनकुड्यैः |
| भिन्नम् | - | विभक्तम् |
| भुवनं | - | लोकम् |
| न छिन्नं | - | अखण्डम् |
| यत्र | - | यस्मिन् देशे |
| परमार्थस्य | - | सत्यस्य |
| अगाधगुहातः | - | गभीरगह्वरात् |
| वाचः | - | पदानि |
| प्रादुःषन्ति | - | प्रादुर्भवन्ति। |

**क्रियाः-** प्रसरति - सृ गतौ- लट् परस्मैपदि,प्र.पु, ए.व.।
प्रादुःषन्ति - प्र दुर् अस भुवि परस्मैपदि. प्र.पु. ब.व.।

**सारः-** यत्र चिन्तायां सङ्कुचितत्वं न संभवति, तत्र मनः जाग्रतां प्राप्नोति, तत्र परमसत्यस्य अगाघगह्वरात् स्वतन्त्रचिन्ता च जायते।

३. यत्र तान्तो यत्नो बाहू
परिपूर्णतायायामयति।
यत्र हि युक्तिविचारमयी सा
नैव विनश्यति विमला तटिनी।
प्रेतप्राचीनाचारमये
मरुसैकतविस्तारे तिमिरे।।

| अन्वयः | | अर्थः |
|---|---|---|
| यत्र | - | यस्मिन् स्थले |
| तान्तः | - | अविश्रान्तः |
| यत्नः | - | परिश्रमः |
| परिपूर्णतायां | - | पूर्णतायां |
| बाहू | - | करौ |
| आयामयति | - | विस्तारयति |
| यत्र | - | यस्मिन् देशे |
| युक्तिविचारमयी | - | युक्तिचिन्तावहा |
| सा | - | एषा |
| विमला | - | शुद्धा |
| तटिनी | - | नदी |
| प्रेतप्राचीनाचारमये | - | मृतपुरातनाचारयुक्ते |
| मरुसैकतविस्तारे | - | मृदारण्यवत् विस्तृते |
| तिमिरे | - | अन्धकारे |
| नैव विनश्यति | - | न विनाशं प्राप्नोति |

**सारः**- यत्र कठिनप्रयत्नः बाहुद्वयं विस्तारयति तथा युक्तिचिन्तावहा विमला तटिनी मृत पुरातनाचारमये मरुविस्तृते अन्धकारे नैव नश्यति तत्र मां प्रापय।

४. सततविसृत्वरचिन्तनकर्मसु
पुरतो नयसे यत्र मनस्त्वम्।
स्वातन्त्र्यस्य स्वर्गे तस्मिन्
प्रतिबुध्येत पितर्मम राष्ट्रम्।।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| यत्र | - | यस्मिन् देशे |
| सततविसृत्वरचिन्तनकर्मसु | - | यदा विकस्वरचिन्तासु प्रवृत्तिषु च |
| मनः | - | चित्तम् |
| त्वं | - | भवान् |
| पुरतः | - | पुरोभागम् |
| नयसे | - | गमनाय साहाय्यं करोषि |
| पितः | - | हे तात! |
| स्वातन्त्र्यस्य | - | स्वतन्त्रतायाः |
| तस्मिन् स्वर्गे | - | तादृशे नाके |
| मम | - | मे |
| राष्ट्रं | - | भारतराष्ट्रम् |
| प्रतिबुध्येत। | - | जागर्तुं शक्तं कुर्वीत। |

**क्रिया-** प्रतिबुध्येत- प्रति बुध अवगमने कर्मणि विधिलिङ् आत्मनेपदि प्र.पु ए.व.।

**सारः**- यत्र भयरहितं मनः, अभिमानेन उन्नतं शिरः, परमं स्वातन्त्र्यं, परितः प्रसृतं विज्ञानं च तथा यत्र सङ्कुचिताभिः भवनभित्तिभिः लोकं पृथक् पृथक् न कुरुते, यत्र अश्रान्तपरिश्रमं परिपूर्तये हस्तं प्रसारयति, यत्र युक्तिबोधस्य प्रकाशं प्राचीनाचारेषु अस्तप्रभं न भवति, यत्र अनुनिमिषं विकसितायां चिन्तायां प्रवृत्तिषु च चित्तं नीयते, तादृशस्वातन्त्र्यचिन्तायां हे पितः मे राष्ट्रं जागर्तुं शक्तं कुरु।

५. अद्य प्रार्थनमेतत् त्वां प्रति
मामकमस्ति विभो ।
प्रहर प्रहर निदाने मम
हृदि दारिद्र्यस्येति।।

| अन्वयः | | अर्थः |
|---|---|---|
| विभो! | - | प्रभो! |
| अद्य | - | अधुना |
| त्वां प्रति | - | भवन्तम् प्रति |
| मामकं | - | मया कृतं |
| एतद् | - | इदम् |
| प्रार्थनं | - | याचनम् |
| अस्ति | - | वर्तते |
| मम | - | मे |
| हृदि | - | हृदये |
| दारिद्र्यस्य | - | निर्धनावस्थायाः |
| निदाने | - | कारणे |
| प्रहर | - | ताडनं दधताम् |
| प्रहर इति | - | पुनः ताडयतु इति। |

**सारः** हे प्रभो! मयि स्थितस्य दारिद्र्यस्य मूलकारणे प्रहर्तुम् अहं प्रार्थयामि।

६. **सुखानि दुःखान्यपि लघु सोढुं**
**शक्तिं मम देहि।**
**प्रणयं सफलयितुं परिचरणे**
**शक्तिं मम देहि।।**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| सुखानि | - | हर्षाणि |
| दुःखानि | - | मनक्लेशाः |
| लघु | - | अल्पम् |
| सोढुं | - | सहनं कर्तुम् |
| मम | - | मे |
| शक्तिं | - | बलम् |
| देहि | - | ददातु |
| प्रणयं | - | स्नेहम् |
| सफलयितुम् | - | साक्षात्कर्तुम् |
| परिचरणे | - | सेवने |
| शक्तिं | - | बलम् |
| मम | - | मे |
| देहि | - | ददातु। |

**सारः-** हे भगवन् ! सुखदुःखानि सोढुं (क्षन्तुं) मह्यं शक्तिं प्रदातु। स्नेहसाक्षात्काराय सहजीविनं सेवितुं च मे शक्तिं ददातु।

७. **यथा कदाचन कमपि न दीनम्**
**जहामि नापि यथा।**
**नमामि दृप्तां प्रभुतां च तथा**
**शक्तिं मम देहि।।**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| यथा | - | येन प्रकारेण |
| कदाचन | - | कदापि |
| दीनं | - | दुःखितम् |
| कमपि | - | कमपि पुरुषम् |
| न जहामि | - | अहं न त्यजामि |
| यथा | - | येन प्रकारेण |
| दृप्तां | - | अहङ्कारयुक्ताम् |
| प्रभुतां अपि | - | प्रभोः भावः तां (प्रभुत्वं अपि) |
| नमामि न | - | न नमस्करोमि |
| तथा | - | तादृक् प्रकारेण |
| शक्तिं | - | बलम् |
| मम | - | मे |
| देहि। | - | ददातु। |

**सारः**- दुःखितं कमपि न त्यक्तुं दर्पयुक्तं अधिकारिणं न नमस्कर्तुं च शक्तिं मे ददातु।

८. **यान्यल्पान्यपि कार्याण्यनुदिन-**
**मापतितान्येषाम्।**
**उपरि मनश्च समुन्नमयितुं**
**शक्तिं मम देहि।**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| यानि | - | यानि (यादृशानि) |
| अल्पानि | - | निस्साराणि(लघूनि) |
| कार्याणि अपि | - | कर्तव्यानि अपि |
| अनुदिनं | - | प्रत्यहम् |
| आपतितानि | - | मार्गे पतितानि (आगतानि सन्ति तानि) |
| एषां | - | एतेषाम् |
| उपरि | - | ऊर्ध्वम् |
| मनः | - | चेतः |
| समुन्नमयितुम् | - | उद्गमयितुम् |
| मम | - | मे |
| शक्तिं | - | बलम् |
| देहि। | - | ददातु। |

**सारः**- अनुदिनं कर्तव्येषु जागर्तुं मनसः शक्तिं प्रदातु। निस्सारकार्योष्वपि मम श्रद्धां पतितुं शक्तिं ददातु।

९. **भवदिङ्गितमनु-**
**वशयितुमपि मे।**
**शक्तिं प्रेम्णा**
**शक्तिं देहि।।**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| मे | - | मह्यम् |
| शक्तिम् | - | बलम् |
| प्रेम्णा | - | स्नेहेन |
| भवदिङ्गितं | - | भवतः इच्छाम् |
| अनुवशयितुं | - | स्वायत्तीकर्तुम् |
| शक्तिं | - | बलम् |
| देहि | - | ददातु। |

**सारः-** मम अखिलां शक्तिं भवतः इच्छानुसारेण प्रवृत्तिपथमानेतुं शक्तिं मे ददातु।

**क्रिया-** ददातु- दाञ् दाने पर. लोट् म.पु.ए.व.।



# पठनप्रवर्तनानि

१. **श्लोकं पठित्वा गद्यक्रमं पूरयत।**

श्रद्धेयाः अंशाः।

- पदबोधः।
- क्रियापदचयनम्।
- अन्वयलेखनम्।

२. **शक्तिं देहि इति पाठमधिकृत्य लघूपन्यासं लिखत।**

श्रद्धेयाः अंशाः।

- पदप्रयोगपाटवम्।
- आशयक्रोडीकरणम्।
- लेखनसामर्थ्यम्।

३. **अस्माकं जीवितं भवनकोणेषु बन्धितं न भवेत्। अस्याशययुक्तां पङ्क्तीं लिखत**

१. सङ्कुचिताभिर्गृहभित्तिभिरपि। यत्र न भिन्नं छिन्नं युवनम्।

२. स्वातन्त्र्यस्य स्वर्गे तस्मिन् प्रतिबुध्येत पितुर्मम राष्ट्रम्।

३. मनश्च समुन्नमयितुं शक्तिं मम देहि।



# अभ्यासः

**१ .समासान् विवेचयतु।**

**श्रद्धेयाः अंशाः।**

- समस्तपदचयनम्।
- विग्रहवाक्यलेखनम्।
- विग्रहपदकोशनिवेशनम्।

**२. स्तोत्रकाव्यं कर्तारं च अधिकृत्य लघुटिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः।**

- स्तोत्रकाव्यपठनम्।
- आशयक्रोडीकरणम्।
- टिप्पणीलेखनम्।

**३. अन्वयं लिखतु।**

**श्रद्धेयाः अंशाः।**

- श्लोकपठनम्।
- पदच्छेदलेखनम्।
- अन्वयलेखनम्।

**४. आशयं लिखतु।**

**श्रद्धेयाः अंशाः।**

- श्लोकपठनम्।
- आशयक्रोडीकरणम्।
- आशयलेखनम्।

**५. आस्वादनटीकां लिखतु।**

**श्रद्धेयाः अंशाः।**

- श्लोकपठनम्।
- आशयक्रोडीकरणम्।
- आस्वादनटीकालेखनम्।

**६. अधो निर्दिष्टानामाशमानाम् उचितं वाक्यं चिनुत।**

सर्वे परिश्रमशीलाः भवेयुः।

- लक्ष्मीपदं श्रीपदमेव पादौ।
- यत्र तान्तो यत्नो बाहुः परिपूर्णतायामयति।
- उपरि मनश्च समुन्नापयितुम्।

**७. युक्तिचिन्ता न नश्यति।**

- यत्र हि युक्तिविचारमयी सा नैव विनश्यति विमला तटिनी।
- जहामि नापि यथा।
- प्रणयं सफलयितुं परिचरणे।

**८. दारिद्र्यम् अपनेतुं मम साहाय्यं कुरु।**

•पुरतो नयसे यत्र मनस्त्वम्।
•प्रतिबुध्येत पितर्मम राष्ट्रम्।
•प्रहर प्रहर निदाने मम हृदि दारिद्र्यस्येति।

**९. सहजीविनं स्नेहेन परिचरितुं मह्यं शक्तिं ददातु।**

•प्रणयं सफलयितुम् परिचरणे शक्तिं मम देहि।
•यत्र हि युक्तिविचारमयी सा।
•पुरतो नयसे यत्र मनस्त्वम्।

**१०. दुःखितं प्रति साहाय्यं कर्तुं मां प्रभावयतु।**

•सततविसृत्वरचिन्तनकर्मसु।
•यथा कदाचन कमपि न दीनम् जहामि नापि तथा।
•नैव विनश्यति विमला तटिनी।

**११. अहङ्कारिणं प्रभुं अवगणयितुं शक्तिं ददातु।**

•नमामि दृप्तां प्रभुतां च तथा शक्तिं मम देहि।
•प्रतिबुध्येत पितर्मम राष्ट्रम्।
•यत्र तान्तो यन्तो बाहू।

**१२. भवतः इच्छानुसारेण प्रवर्तयितुं शक्तिं ददातु।**

•पुरतो नयसे यत्र मनस्त्वम्।
•प्रति मामकमस्ति विभो।
•भवदिङ्गितमनुवशयितुमपि मे।

**१३. अधोदत्तेषु भवतः इष्टतमः श्लोकः कः? कारणं किम्?**

- यत्र विनिर्भयमुदयति हृदयम्
 यत्तोदात्तो मूर्धोदेति।
 यत्र प्रसरति परितो ज्ञानम्
 परमं स्वातन्त्र्यं विदधानम्।।
- सङ्कुचिताभिर्गृहभित्तिभिरपि
 यत्र न भिन्नं छिन्नम् भुवनम्।
 यत्र प्रादुःषन्ति च वाचः
 परार्थस्यागधगुहातः।।
- सततंविस्तृत्वरचिन्तनकर्मसु
 पुरतो नयसे यत्र मनस्त्वम्।
 स्वातन्त्र्यस्य स्वर्गो तस्मिन्
 प्रतिबुद्ध्येत पितर्मम राष्ट्रम्।

**१४. स्वातन्त्र्यस्य, परिश्रमस्य च महत्वसूचकान् अन्यान् श्लोकान् संचिनोतुं छात्रान् निर्दिशति अध्यापकः।**

# किमधिगतम् ?

**पठनप्रवर्तनानि यथाकालं कृतानि साधुतासूचकचिह्नं(√) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः |
|---|---|---|---|---|
| १. | काव्यालापनम् | | | |
| २. | नूतनपदचयनम् | | | |
| ३. | सन्धिच्छेदः | | | |
| ४. | समासः | | | |
| ५. | अन्वयः | | | |
| ६. | आशयलेखनम् | | | |

## एककम्-४



# रमणीयता

# एककम्-४
# रमणीयता

## आमुखम्

कालिदासः कविगुलगुरुः इति प्रकीर्त्यते। तस्य रचनारत्नानि सर्वदा संस्कृतवाङ्मयमहाकाशे चण्डांशुप्रभानिकराणीव विराजन्ते। तस्य रघुवंशमपि इतररचनाः इव ध्वनिप्रधानम्, अलङ्कारप्रधानञ्च महाकाव्यं भवति। अत्र रघुवंशमहाकाव्यस्य पञ्चमसर्गात् उद्धृताः चतुर्दशश्लोकाः दीयन्ते। वरतन्तोः शिष्यः कौत्सः गुरुदक्षिणायै साहाय्यमर्थयन् रघोः समीपम् आगच्छति। रघुः तदा 'विश्वजित्' नामकेन यागेन शून्यीकृतकोशः दरिद्रो भूत्वा वर्तते स्म। रघुवंशमहाकाव्यात् कौत्सरघुसंवादः अत्र पाठरूपेण स्वीकृतः।

संस्कृतसाहित्यं गद्यपद्यचम्पूरूपेण त्रिधा विभज्यते। "गद्यं कवीनां निकषं वदन्ति" इति काव्यशास्त्रविशारदाः। संस्कृतसाहित्ये गद्यशाखा विरला एव दृश्यते। गद्यप्रबन्धेषु बाणभट्टस्य कादम्बरी प्रथमं स्थानम् अलंकरोति इति निस्तर्कः। "कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते" "बाणोच्छिष्टं जगत्सर्वम्" "वाणी बाणो बभूव हि" इत्याद्याः सूक्तयः तस्य कवेः प्राधान्यं दर्शयति। गौडीयारीतियुक्तम्, ओजोगुणयुक्तं ध्वन्यात्मकं च गद्यकाव्यं भवति बाणभट्टस्य कादम्बरी। तस्य ग्रन्थस्य संग्रहीतपुनराख्यानं भवति चन्द्रापीडचरितम्। तस्मात् उद्धृतः पुण्डरीकमहाश्वेतासमागमः एव अत्र पाठ्यभागः।

काव्येषु ध्वनिः अलङ्कारः रीतिः वक्रोक्तिः रसः इत्याद्याः विशेषताः अन्तर्भवन्ति। ताः काव्ये हृदये च रमणीयतामुत्पादयन्ति। उक्तञ्च

"सौन्दर्यमलङ्कारः" इति। " क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः" इति च।



## पठनाधिगमः

- पञ्चमहाकाव्यान्यधिकृत्य टिप्पणीं लिखति।
- काव्यम् आलपति।
- महाकाव्येषु रघुवंशस्य प्राधान्यं लिखति।
- कालिदासस्य अन्यकृतीन् अधिकृत्य टिप्पणीं लिखति।
- कालिदासस्य वर्णनारीतिम् अवगम्य वर्णनां करोति।
- नूतनपदानि ज्ञात्वा नवीनसन्दर्भे प्रयुङ्क्ते।
- विविधाः अलङ्कारपद्धतीः प्रयोक्तॄन् च अधिकृत्य सङ्गोष्ठिं चालयति।
- अलङ्कारपद्धतीः तुलनां करोति।

# ४.१

# दानमेव महीयते।



## प्रवेशकः

कालदेशपरिधीनुल्लङ्घ्य सर्वत्र विराजमानेषु कवनतल्लजेषु सर्वाः जीवितावस्थाः ध्वनिप्रतिध्वनिपरंपरया उपनिबद्धाः। भारतवर्षस्य इतिहासपरम्परायां कल्पितप्रभावाः अनेकाः कथाः बहूनां नृपाणाञ्च वर्णनम् रघुवंशमहाकाव्ये दृश्यते। यथा दिलीपः , रघुः, अजः, दशरथः , श्रीरामः, भरतः इत्यादयः सम्राजः। एवं तस्मिन् काव्ये नैको नायकः किन्तु अनेके सन्ति। दिलीपादारभ्य अग्निवर्णपर्यन्तानां ऊनत्रिंशत् नृपाणां वर्णनं एकोनविंशतिभिः सर्गैः क्रियते अनेन। दातुः स्वीकर्तुः च तृप्त्या एव दानं महीयते इति सन्दर्भास्यास्य सन्देशः ।

१. **तमध्वरे विश्वजिति क्षितीशं**
**निश्शेषविश्राणितकोषजातम्।**
**उपात्तविद्यो गुरुदक्षिणार्थी**
**कौत्सः प्रपेदे वरतन्तुशिष्यः।।**

पदच्छेदः

तमध्वरे - तम् +अध्वरे।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| विश्वजिति अध्वरे | - | 'विश्वजित्' नामके यागे |
| निःशेषविश्राणितकोषजातम् | - | सम्पूर्णतया धनदानात् शून्यीभूतभण्डागारं |
| क्षितीशम् | - | राजानं, नृपम् |
| उपात्तविद्यः | - | आर्जितविद्यः |
| वरतन्तुशिष्यः | - | वरतन्तुनामकस्य आचार्यस्य शिष्यः। |
| कौत्सः | - | कौत्सनामकः |
| गुरुदक्षिणार्थी | - | गुरुदक्षिणां दातुम् इच्छन् |
| तम् | - | रघुम् |
| प्रपेदे। | - | प्राप्तवान्। |

**सारः-** विश्वजित् नामके यागे सर्वमपि धनं राज्ञा रघुणा व्ययितम्। तेन शून्यीकृतेन भण्डागारेण सहितस्य नृपस्य रघोः समीपे चतुर्दशविद्याम् अधीतः वरतन्तोः शिष्यः कौत्सः गुरवे देयां गुरुदक्षिणां सम्पादयितुम् आगच्छत्।

**व्याख्या-** प्रपेदे प्र पूर्वक पत्लृ गतौ धातोः लिट् परस्मैपदि प्रथमपुरुष एकवचनम्।

'यज्ञस्सत्रोऽध्वरो यागः' इत्यमरः।

'कोषोऽस्त्री कुड्मले खड्गे पिधानेऽर्थौधदिव्ययोः' इत्यमरः।

क्षितीशम्- क्षितेः ईशः क्षितीशः तम्। निश्शेषविश्राणितकोषजातम्- निश्शेषेण विश्राणितः कोषजातः यस्य तम्। गुरुदक्षिणार्थी गुरवे देया दक्षिणा गुरुदक्षिणा, गुरुदक्षिणाम् अर्थयतीति गुरुदक्षिणार्थी।

२. **स मृन्मये वीतहिरण्मयत्वात्**
**पात्रे निधायार्घ्यमनर्घशीलः।**
**श्रुतप्रकाशं यशसा प्रकाशः**
**प्रत्युज्जगामातिथिमातिथेयः।।**

**पदच्छेदः**

निधायार्घ्यमनर्घशीलः - निधाय +अर्घ्यम् +अनर्घशीलः।

प्रत्युज्जगमातिथिमातिथेयः - प्रत्युज्जगाम+अतिथिम् +आतिथेयः।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अनर्घशीलः | - | सत्स्वभावः |
| यशसा | - | कीर्त्या |
| प्रकाशः | - | प्रशोभमानः |
| आतिथेयः | - | अतिथिसेवाकारकः |
| सः | - | रघुः |
| वीतहिरण्मयत्वात् | - | सुवर्णपात्रस्य अभावत्वात् |
| मृन्मये | - | मृत्तिकानिर्मिते। |
| पात्रे | - | भाजने |
| अर्घ्यम् | - | पूजाद्रव्यम् |
| निधाय | - | स्थापयित्वा |
| श्रुतप्रकाशम् | - | शास्त्रविशारदं |
| अतिथिम् | - | आगन्तुकं (कौत्सं) |
| प्रत्युज्जगाम। | - | स्वीचकार। |

**सारः** सुशीलः यशसा प्रशोभमानः अतिथिप्रियः रघुः आगतं शास्त्रप्रवीणम् अतिथिं कौत्सं मृन्मये पात्रे पूजाद्रव्याणि निधाय स्वीचकार।

**व्याख्या-** श्रूयत इति श्रुतं वेदशास्त्रम्। 'श्रुतं शास्त्रावधृतयोः' इत्यमरः। वीतहिरण्मयत्वात्- हिरण्यस्य विकारः हिरण्मयम्। वीतं हिरण्मयं वीतहिरण्मयं, तस्य भावः वीतहिरण्मयत्वं, तस्मात् वीतहिरण्मयत्वात्। अनर्घशीलः- न अर्घः अनर्घः, अनर्धं शीलं यस्य सः अनर्धशीलः। मृन्मये - मृतः विकारः मृन्मयम्, तस्मिन्। आतिथेयः अतिथिषु साधु आतिथेयः। प्रत्युज्जगाम- प्रति, उत् पूर्वक गम्लृ गतौ धातोः लिट् परस्मैपदि प्र.पु.ए.व।

३. **तमर्चयित्वा विधिवद्विधिज्ञः**
**तपोधनं मानधनाग्रयायी।**
**विशाम्पतिर्विष्टरभाजमारात्**
**कृताञ्जलिः कृत्यविदित्युवाच।।**

**पदच्छेदः**

| | | |
|---|---|---|
| तमर्चयित्वा | - | तम् + अर्चयित्वा। |
| विधिवद्विधिज्ञः | - | विधिवत् + विधिज्ञः। |
| विष्टरभाजमारात् | - | विष्टरभाजम् + आरात्। |
| कृत्यविदित्युवाच | - | कृत्यवित् +इति +उवाच। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| विधिज्ञः | - | शास्त्रज्ञः |
| मानधनाग्रयायी | - | मानधनानाम् अग्रेसरः |
| कृत्यवित् | - | कार्यकारणज्ञः |

| | | |
|---|---|---|
| विशांपतिः | - | मनुजेश्वरः |
| विष्टरभाजम् | - | आसने उपविष्टम् |
| तं तपोधनम् | - | तं तपस्विनं (कौत्सं) |
| विधिवत् | - | विधिमनुसृत्य (यथाशास्त्रम्) |
| अर्चयित्वा | - | पूजां कृत्वा |
| आरात् | - | समीपे |
| कृताञ्जलिः | - | अञ्जलीबद्धः सन् |
| इति | - | ईदृशम् (वक्ष्यमाणप्रकारेण) |
| उवाच। | - | अवदत्। |

**सारः-** विधिज्ञः रघुः अतिथिं यथाविधि पूजयित्वा कृताञ्जलिः सन् कौत्सम् आगमनोद्देश्यमपृच्छत्।

**व्याख्या-** विष्टरम्- 'विष्टरौ विटपीदर्भमुष्टिः पीठाद्यमासनम्' इत्यमरः।

विधिज्ञः विधिं जानाति इति विधिज्ञः।

मानधनाग्रयायी -मानमेव धनं मानधनं, अग्रे यानं शीलमस्येति अग्रयायी, मानधनानाम् आग्रयायी।

उवाच- ब्रूञ् वक्तायां वाचि धातोः परस्मैपदि लिट् प्रथमपुरुष एकवचनम्।

४. **अप्यग्रणीर्मन्त्रकृतामृषीणां**
**कुशाग्रबुद्धे! कुशली गुरुस्ते।**
**यतस्त्वया ज्ञानमशेषमाप्तं**
**लोकेन चैतन्यमिवोष्णरश्मेः॥**

**पदच्छेदः**

| | | |
|---|---|---|
| अप्यग्रणीः | - | अपि +अग्रणीः। |
| मन्त्रकृतामृषीणाम् | - | मन्त्रकृताम् +ऋषीणाम्। |
| गुरुस्ते | - | गुरुः +ते। |
| यतस्त्वया | - | यतः +त्वया। |
| ज्ञानमशेषमाप्तम् | - | ज्ञानम् +अशेषम् +आप्तम्। |
| चैतन्यमिवोष्णरश्मेः | - | चैतन्यम् +इव +उष्णरश्मेः। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| कुशाग्रबुद्धे! | - | हे सूक्ष्मबुद्धे! |
| मन्त्रकृतां | - | मन्त्रस्रष्टॄणाम् |
| ऋषीणां | - | मुनीनाम् |
| अग्रणीः | - | श्रेष्ठः |
| ते | - | तव |
| गुरुः | - | आचार्यः |
| कुशली अपि? | - | क्षेमवान् किम्? |
| यतः | - | यस्मात् |
| त्वया | - | भवता |
| अशेषं | - | पूर्णम् |
| ज्ञानं | - | विज्ञानम् |
| लोकेन | - | जनेन, विश्वेन |
| उष्णरश्मेः | - | सूर्यात् |
| चैतन्यमिव | - | चेतनामिव |
| आप्तम्। | - | स्वीकृतम् (भवति)। |

**सारः-** हे महात्मन्! सूर्यात् लोकेन चैतन्यं यथा प्राप्तं तथा यस्मात् भवान् सम्पूर्णं विज्ञानमाप्तवान् सः आचार्यः कुशली खलु।

**व्याख्या-** कुशाग्रबुद्धे!- कुशाग्रा बुद्धिः यस्य सः कुशाग्रबुद्धिः, तत्संबुद्धौ।

उष्णरश्मेः उष्णाः रश्मयः यस्य सः उष्णरश्मिः तस्मात्।

आप्तम् - आप्लृ व्याप्तौ धातोः क्तप्रत्ययान्तं रूपम्।

अपि प्रश्ने - 'गर्हासमुच्चयप्रश्नसङ्काशसम्भावनास्वपि' इत्यमरः।

५. **तवार्हतो नाभिगमेन तृप्तं**
**मनो नियोगक्रिययोत्सुकं मे।**
**अप्याज्ञया शासितुरात्मनो वा**
**प्राप्तोऽसि संभावयितुं वनान्माम्॥**

**पदच्छेदः**

| | | |
|---|---|---|
| तवार्हतः | - | तव +अर्हतः। |
| नाभिगमेन | - | न + अभिगमेन। |
| नियोगक्रिययोत्सुकं | - | नियोगक्रियया + उत्सुकम्। |
| अप्याज्ञया | - | अपि + आज्ञया। |
| शासितुरात्मनो | - | शासितुः +आत्मनः। |
| प्राप्तोऽसि | - | प्राप्तः +असि। |
| वनान्माम् | - | वनात् +माम्। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अर्हतः | - | पूज्यस्य |
| तव | - | कौत्सस्य |
| अभिगमेन | - | आगमनेन |
| मे मनः | - | मम चित्तम् |
| न तृप्तम् | - | न सन्तुष्टम् |
| किन्तु | - | परन्तु |
| नियोगक्रियया | - | आज्ञाकरणेन (आज्ञया) |
| उत्सुकं मां | - | उत्कण्ठाकुलं मां (रघुम्) |

| | | |
|---|---|---|
| शासितुः | - | गुरोः |
| आत्मनो वा | - | स्वस्य वा |
| आज्ञया अपि | - | अनुज्ञया अपि |
| संभावयितुम् | - | सम्मानयितुम् |
| वनात् | - | काननात् |
| प्राप्तः असि। | - | सम्प्राप्तः भवसि (किम्)? |

**सारः** प्रशंसायोग्येन भवतः आगमनेन केवलं मम मनः सन्तुष्टं न भवति। अतः भवतः गुरोः वा आज्ञापरिपालनाय मां नियोक्तुमेव भवान् काननात् संप्राप्तः किम्? इति जिज्ञासुरस्मि।

**व्याख्या-** असि - अस भुवि परस्मैपदी लट् मध्यमपुरुष एकवचनम्।
उत्सुकः - 'इष्टार्थोद्युक्त उत्सुकः' इत्यमरः।

**६. इत्यर्घ्यपात्रानुमितव्ययस्य**
**रघोरुदारामपि गां निशम्य।**
**स्वार्थोपपत्तिं प्रति दुर्बलाशः**
**तमित्यवोचद्वरतन्तुशिष्यः॥**

**पदच्छेदः**

| | | |
|---|---|---|
| इत्यर्घ्यपात्रानुमितव्ययस्य | - | इति +अर्घ्यपात्रानुमितव्ययस्य। |
| रघोरुदारामपि | - | रघोः+ उदाराम् +अपि। |
| तमित्यवोचत् | - | तम् +इति +अवोचत्। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अर्घ्यपात्रानुमितव्ययस्य | - | पूजार्थम् आनीतात् मृन्मयपात्रात् दरिद्रोऽभवदिति अनुमीय |
| रघोः | - | रघुनाम्नः राज्ञः |

| | | |
|---|---|---|
| उदारम् अपि | - | औदार्यमयीमपि |
| गाम् | - | वाणीम् |
| निशम्य | - | आकर्ण्य |
| वरतन्तुशिष्यः | - | कौत्सः (वरतन्तुनामकस्य गुरोः शिष्यः) |
| स्वार्थोपपत्तिं प्रति | - | स्वकार्यसम्पादनार्थम् |
| दुर्बलाशः सन् | - | आशारहितः सन् (निराशः सन्) |
| तम् | - | राजानम् |
| इति | - | एवम् |
| अवोचत् | - | उवाच। |

**सारः** कौत्सं स्वीकर्तुम् आगतस्य राज्ञः हस्ते मृन्मयपात्रस्य दर्शनात् राजा दरिद्रः संवृत्तः इति ज्ञात्वा वरतन्तुशिष्यः कौत्सः स्वकार्यसम्पादनं रघुसकाशात् असाध्यमिति चिन्तयित्वा राजानमेवमुवाच।

**व्याख्या-** गाम्-'स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणि भूजले। लक्ष्यदृष्ट्याः स्त्रियां पुंसि गौः' इत्यमरः।

स्वार्थोपपत्तिम्- स्वस्य अर्थं स्वार्थम् स्वार्थे उपपत्तिः स्वार्थोपपत्तिः ताम्।

दुर्बलाशः- दुर्बला आशा यस्य सः दुर्बलाशः।

अवोचत् वच परिभाषणे धातोः परस्मैपदी लङ् प्रथमपुरुष एकवचनम्। अर्घ्यपात्रात् अनुमितः व्ययः यस्य तस्य अर्घ्यपात्रानुमितव्ययस्य।

७. **समाप्तविद्येन मया महर्षिः**
**विज्ञापितोऽभूद् गुरुदक्षिणायै।**
**स मे चिरायास्खलितोपचारां**
**तां भक्तिमेवागणयत्पुरस्तात्।।**

**पदच्छेदः**

| | | |
|---|---|---|
| विज्ञापितोऽभूत् | - | विज्ञापितः +अभूत्। |
| चिरायास्खलितोपचारां | - | चिराय +अस्खलितोपचारां । |
| भक्तिमेवागणयत्पुरस्तात् | - | भक्तिम् + एव +अगणयत्+ पुरस्तात्। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| समाप्तविद्येन | - | अभ्यस्तविद्येन |
| मया | - | कौत्सेन |
| महर्षिः | - | वरतन्तुः |
| गुरुदक्षिणायै | - | गुरुदक्षिणार्थं, गुरुदक्षिणास्वीकारार्थं |
| विज्ञापितः | - | प्रार्थितः |
| अभूत् | - | अभवत् |
| सः | - | सः (वरतन्तुः) |
| चिराय | - | चिरकालं |
| अस्खलितोपचाराम् एव | - | अन्यूनं परिचरणम् एव |
| मे भक्तिम् | - | मम गुरुभक्तिम् |
| पुरस्तात् | - | प्रथमम् |
| अगणयत्। | - | परिगणितवान्। |

**सारः** विद्यां समाप्य गुरुदक्षिणां दातुमुत्सुकः कौत्सः गुरुदक्षिणां स्वीकर्तुं गुरुं प्रार्थितवान्। गुरुं प्रति कौत्सस्य अचञ्चलिता भक्तिरेव गुरुदक्षिणारूपेण वरतन्तुः परिगणितवान् । अर्थात् तव भक्तिरेव गुरुदक्षिणा भवति इति गुरुः कथितवान्।

**व्याख्या-** ऋषिः-‘ऋषयः सत्यवचसः स्नातकस्त्वाप्लवव्रती’ इत्यमरः।

समाप्तविद्येन- समाप्ता विद्या येन सः समाप्तविद्यः तेन ।

अस्खलितोपचारां-न सस्खलिताः अस्खलिताः उपचाराः यस्य ताम्।
अगणयत् गण संख्याने परस्मैपदि लङ् प्रथमपुरुष एकवचनम्।

८. **निर्बन्धसञ्जातरुषाऽर्थकार्श्यम्**
**अचिन्तयित्वा गुरुणाहमुक्तः।**
**वित्तस्य विद्यापरिसंख्यया मे**
**कोटीश्चतस्रो दश चाहरेति।।**

**पदच्छेदः**

| | | |
|---|---|---|
| निर्बन्धसञ्जातरुषाऽर्थकार्श्यम् | - | निर्बन्धसञ्जातरुषा +अर्थकार्श्यम् |
| गुरुणाहमुक्तः | - | गुरुणा +अहम् +उक्तः। |
| कोटीश्चतस्रः | - | कोटीः+ चतस्रः। |
| चाहरेति | - | च +आहर +इति। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| निर्बन्धसञ्जातरुषा | - | प्रार्थनातिशयेन सञ्जातक्रोधेन (पुनः पुनरपि गुरुं याचितवान् तेन सम्प्राप्तेन कोपेन ) |
| गुरुणा | - | वरतन्तुना |
| अर्थकार्श्यम् | - | दारिद्र्यम् |
| अचिन्तयित्वा | - | अविचार्य |
| विद्यापरिसंख्यया | - | विद्यापरिसंख्याऽनुसारेण |
| वित्तस्य | - | धनस्य |
| चतस्रः दश च कोटीः | - | चतुर्दशकोटीः (सुवर्णान्) |
| मे | - | मह्यम् |
| आहर इति | - | आनय इति |
| अहं उक्तः | - | अहं कथितः। |

**सारः** गुरुदक्षिणां स्वीकर्तुं पुनःपुनरपि कौत्सः गुरुं याचितवान् । तस्य निर्बन्धेन कोपाकुलः गुरुः वरतन्तुः कौत्सस्य दारिद्र्यम् अचिन्तयन् चतुर्दशकोटीः सुवर्णान् आहर्तुमवदत्। (यावतीं विद्यां मम सकाशात् अधीतः तावतीं संख्याकां कोटीं सुवर्णम् आनय इति गुरुरवदत्)।

**व्याख्या-** निर्बन्धसञ्जातरुषा- निर्बन्धेन सञ्जातः रुट् येन सः निर्बन्धसञ्जातरुट्, तेन निर्बन्धसञ्जतरुषा।

अर्थकार्श्यम्- अर्थस्य कार्श्यम् ।

कृशतायाः भावः कार्श्यम्। गुरुणा अहम् उक्तः -कर्मणि प्रयोगः। गुरुः माम् उक्तवान् - कर्तरि प्रयोगः। 'द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसुः' इत्यमरः।

आहर- आङ् हृञ् हरणे - पर-लोट्-म.पु.ए.व

९. **इत्थं द्विजेन द्विजराजकान्तिः**
**आवेदितो वेदविदां वरेण।**
**एनोनिवृत्तेन्द्रियवृत्तिरेनं**
**जगाद भूयो जगदेकनाथः।।**

**पदच्छेदः**

एनोनिवृत्तेन्द्रियवृत्तिरेनम् - एनोनिवृत्तेन्द्रियवृत्तिः + एनम्।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| द्विजराजकान्तिः | - | चन्द्रतुल्यकान्तिमान् |
| एनोनिवृत्तेन्द्रियवृत्तिः | - | पापान्निवृत्तेन्द्रियवृत्तिः |
| जगदेकनाथः | - | रघुः |
| वेदविदां वरेण | - | वेदज्ञानां श्रेष्ठेन |
| द्विजेन | - | विप्रेण (कौत्सेन) |

| | | |
|---|---|---|
| इत्थम् | - | ईदृशम् |
| आवेदितः सन् | - | निवेदितः सन् |
| एनम् | - | कौत्सम् |
| भूयः | - | पुनः |
| जगाद। | - | अवोचत्। |

**सारः-** वेदविदां वरः ब्राह्मणः कौत्सः एवं यदा जगतां नाथं राजानं रघुं आवेदितवान् तदा जितेन्द्रियः रघुः कौत्सं पुनरपि अवदत्।

**व्याख्या-** 'द्विजराजः शशधरे नक्षत्रेशः क्षपाकरः' इत्यमरः।

द्विजेन -द्विः जायते इति द्विजः तेन द्विजेन। द्विजराजकान्तिः द्विजराजस्य कान्तिः इव कान्तिः यस्य सः द्विजराजकान्तिः। वेदविदाम् वेदान् वेत्तीति वेदवित् तेषां वेदविदाम् । एनोनिवृत्तेन्द्रियवृत्तिः- एनसः निवृत्ता इन्द्रियवृत्तिः यस्य सः एनोनिवृत्तेन्द्रियवृत्तिः।

जगदेकनाथः- जगताम् एक एव नाथः जगदेकनाथः

जगाद गद व्यक्तायां वाचि पर. लिट् प्र.पु. ए.व.।

**१०. गुर्वर्थमर्थी श्रुतपारदृश्वा**
**रघोः सकाशादनवाप्य कामम्।**
**गतो वदान्यान्तरमित्ययं मे**
**मा भूत्परीवादनवावतारः।।**

**पदच्छेदः**

| | | |
|---|---|---|
| गुर्वर्थमर्थी | - | गुर्वर्थम् + अर्थी। |
| सकाशादनवाप्य | - | सकाशात् +अनवाप्य। |
| वदान्यान्तरमित्ययम् | - | वदान्यान्तरम् +इति +अयम्। |

| अन्वयः | | अर्थः |
|---|---|---|
| श्रुतपारदृश्वा | - | वेदान्तपारंगतः |
| गुर्वर्थम् | - | गुरुदक्षिणार्थम् |
| अर्थी | - | याचकः भूत्वा |
| रघोः | - | रघोः (राज्ञः) |
| सकाशात् | - | समीपात् |
| कामम् | - | मनोरथम् |
| अनवाप्य | - | अप्राप्य |
| वदान्यान्तरं | - | दात्रन्तरम् (अन्यं दातारम्) |
| गतः इति | - | गतवानिति |
| अयं | - | इत्येवं रूपः |
| मे | - | मम |
| परीवादनवावतारः | - | अपवादस्य नूतनावतारः |
| मा भूत्। | - | मा भवतु। |

**सारः** वेदान्तसारपारंगतः कौत्सः गुरुदक्षिणार्थी भूत्वा राजानं रघुं समेत्य निष्फलमनोरथः सन् अन्यं दातारम् अगच्छत् इत्येवंरूपः कश्चन नूतनः अपवादः मम मा अस्तु।

**व्याख्या-** गुरवे अयं गुर्वर्थम्। श्रुतपारदृश्वा- श्रुतस्य पारं दृष्टवान् इति श्रुतपारदृश्वा। परीवादनवावतारः - परीवादस्य नवः अवतारः। "मा भूत्" इत्यत्र मा अभूत् इति वक्तव्ये "न माङ्योगे" इति अडागमनिषेधः। "माङि लुङ्" इति माङः योगे 'लुङ्' लकारः "वदान्यः स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे" इत्यमरः।

**११. तथेति तस्यावितथं प्रतीतः**
**प्रत्यग्रहीत्सङ्गरमग्रजन्मा।**
**गामात्तसारां रघुरप्यवेक्ष्य**
**निष्क्रष्टुमर्थं चकमे कुबेरात्।।**

**पदच्छेदः**

| | | |
|---|---|---|
| तथेति | - | तथा +इति। |
| तस्यावितथं | - | तस्य +अवितथम्। |
| प्रत्यग्रहीत्सङ्गरमग्रजन्मा | - | प्रत्यग्रीत्+ सङ्गरम् +अग्रजन्मा। |
| गामात्तसाराम् | - | गाम् +आत्तसाराम्। |
| रघुरप्यवेक्ष्य | - | रघुः +अपि +अवेक्ष्य। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अग्रजन्मा | - | ब्राह्मणः |
| प्रतीतः सन् | - | प्रीतः सन् |
| तस्य | - | रघोः |
| अवितथम् | - | अमोघम् |
| सङ्गरम् | - | प्रतिज्ञाम् |
| तथा इति | - | तथास्तु इति |
| प्रत्यग्रहीत् | - | स्वीचकार |
| रघुः अपि | - | राजापि |
| गाम् | - | भूमिम् |
| आत्तसाराम् | - | गृहीतधनाम् |
| अवेक्ष्य | - | दृष्ट्वा |
| कुबेरात् | - | कुबेरस्य सकाशात् |
| अर्थम् | - | धनम् |
| निष्क्रष्टुम् | - | आहर्तुम् |
| चकमे। | - | अभिललाष। |

**सारः** सन्तुष्टः ब्राह्मणः कौत्सः रघोः प्रतिज्ञामाकर्ण्य सफलमनोरथः सन् तथास्तु इति स्वीचकार। राजा रघुश्च गृहीतसम्पूर्णधनां भूमिमवेक्ष्य कुबेरात् धनमाहर्तुम् अभिललाष।

**व्याख्या-** न वितथम्- अवितथम्। अग्रजन्मा अग्रे जन्म यस्य सः अग्रजन्मा। प्रत्यग्रहीत्-प्रति पूर्वक ग्रह उपादाने धातोः परस्मैपदी लङ् प्रथमपुरुष एकवचनम्।

चकमे - कमु कान्तौ धातोः परस्मैपदी लिट् प्रथमपुरुष एकवचनम्

सङ्गरम्- "अथ प्रतिज्ञाऽऽजिसंविदापत्सु सङ्गरः" इत्यमरः।

**१२. प्रातः प्रयाणाभिमुखाय तस्मै**
**सविस्मयाः कोशगृहे नियुक्ताः।**
**हिरण्मयीं कोषगृहस्य मध्ये**
**वृष्टिं शशंसुः पतितां नभस्तः॥**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| प्रातः | - | प्रभाते |
| प्रयाणाभिमुखाय | - | यात्रां कर्तुं तत्पराय |
| तस्मै | - | रघवे |
| कोषगृहे | - | भण्डागारे |
| नियुक्ताः | - | अधिकृताः |
| सविस्मयाः | - | विस्मयेन सहिताः |
| कोशगृहस्य | - | भाण्डागारस्य |
| मध्ये | - | मध्यभागे |
| नभस्तः | - | आकाशतः |

| | | |
|---|---|---|
| पतितां | - | निपतिताम् |
| हिरण्मयीं | - | सुवर्णमयीं |
| वृष्टिं | - | वर्षाम् |
| शशंसुः। | - | प्रशंसापूर्वं कथयामासुः। |

**सारः-** प्रभाते यात्रां कर्तुमुत्सुकस्य रघोः पुरतः भण्डागारे नियुक्ताः अधिकारिणः आगत्य सविस्मयम् 'भण्डागारे आकाशतः सुवर्णमयी वृष्टिरपतत्' इति वृत्तान्तमकथयन्।

**व्याख्या-** कोशः "कोशश्च हिरण्यं च हेमरूप्ये कृताकृते" इत्यमरः।
विस्मयेन सह वर्तन्ते इति सविस्मयाः।
शशंसुः- शंसु स्तुतौ धातोः परस्मैपदि लिट् प्रथमपुरुष बहुवचनम्।

**१३. तं भूपतिर्भासुरहेमराशिं**
**लब्धं कुबेरादभियास्यमानात्।**
**दिदेश कौत्साय समस्तमेव**
**पादं सुमेरोरिव वज्रभिन्नम्।।**

**पदच्छेदः-**

| | | |
|---|---|---|
| भूपतिर्भासुरहेमराशिम् | - | भूपतिः +भासुरहेमराशिम्। |
| कुबेरादभियास्यमानात् | - | कुबेरात् + अभियास्यमानात्। |
| समस्तमेव | - | समस्तम् + एव। |
| सुमेरोरिव | - | सुमेरोः + इव। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| भूपतिः | - | राजा (रघुः) |
| अभियास्यमानात् | - | अभिगमिष्यमाणात् |

| | | |
|---|---|---|
| कुबेरात् | - | वैश्रवणात् |
| लब्धम् | - | प्राप्तम् |
| वज्रभिन्नम् | - | कुलिशेन भिन्नम् |
| सुमेरोः | - | सुमेरुपर्वतस्य |
| पादम् इव | - | चरणमिव |
| तम् | - | आकाशात् पतितम् |
| भासुरहेमराशिम् | - | दीप्यमानसुवर्णसमूहम् |
| समस्तम् | - | पूर्णतया |
| कौत्साय | - | वरतन्तुशिष्याय |
| दिदेश। | - | अयच्छत्। |

**सारः** राजा रघुः कुबेरात् संप्राप्तं सम्पूर्णं सुवर्णराशिं पूर्णतया कौत्साय अदात्।

**व्याख्या-** भासुरहेमराशिम्- भासुरं हेमराशिं भासुरहेमराशिंम्। भुवः पतिः भूपतिः । वज्रेण भिन्नं वज्रभिन्नम्। दिदेश दिश् दाने परस्मैपदी लिट् प्रथमपुरुष एकवचनम्। "पादाः प्रत्यन्तपर्वतः" इत्यमरः।

**१४. जनस्य साकेतनिवासिनस्तौ**
**द्वावप्यभूतामभिनन्द्यसत्वौ।**
**गुरुप्रदेयाधिकनिःस्पृहाऽर्थी**
**नृपोऽर्थिकामादधिकप्रदश्च॥**

**पदच्छेदः**

| | | |
|---|---|---|
| साकेतनिवासिनस्तौ | - | साकेतनिवासिनः +तौ। |
| द्वावप्यभूतामभिनन्द्यसत्वौ | - | द्वौ +अपि +अभूताम्+अभिनन्द्यसत्वौ। |

नृपोऽर्थिकामादधिकप्रदश्च - नृपः + अर्थिकामात् + अधिकप्रदः +च।

| अन्वयः | | अर्थः |
|---|---|---|
| गुरुप्रदेयाधिकनिस्पृहः | - | गुरूपदेयातिरिक्तद्रव्ये अनासक्तः |
| अर्थी | - | याचकः (कौत्सः) |
| अर्थिकामात् | - | अर्थिमनोरथात् |
| अधिकप्रदः | - | अधिकं प्रदातुम् उत्सुकः |
| नृपः च | - | राजा च |
| तौ द्वौ अपि | - | कौत्सः रघुः च |
| साकेतनिवासिनः | - | अयोध्यावासिनः |
| जनस्य | - | जनसमूहस्य |
| अभिनन्द्यसत्वौ | - | अभिनन्दनयोग्यौ |
| अभूताम्। | - | अभवताम्। |

**सारः** गुरवे दातुं आवश्यकादधिकं सुवर्णं स्वीकर्तुं विमुखः कौत्सः याचनादधिकं दातुमुत्सुकः नृपः रघुः च अयोध्यानिवासिनः अभिनन्दनयोग्यौ अभूताम्।

**व्याख्या-** साकेते निवासिनः साकेतनिवासिनः। गुरुप्रदेयम्- दातुं योग्यं देयम्, गुरवे प्रदेयं गुरुप्रदेयम्।

गुरुप्रदेयाधिकनिस्पृहः - गुरुप्रदेयात् अधिके निस्पृहः।

निस्पृहः - निर्गता स्पृहा यस्मात् सः निस्पृहः।

सत्वः "द्रव्यासुव्यवसायेषु सत्वमस्त्री तु जन्तुषु" इत्यमरः।

अभूताम्- भू सत्तायाम् पर.प. लुङ् प्र.पु.द्वि. व.।



# पठनप्रवर्तनानि

१. **काव्यं कक्ष्यायाम् आलपतु।**

श्रद्धेयाः अंशाः।

- अक्षरव्यक्तिः।
- सतालालपनम्।
- अर्थबोधः।

२. **नूतनपदचयनं कृत्वा शब्दकोशे निवेशयतु।**

श्रद्धेयाः अंशाः।

- नूतनपदानां चयनम्।
- अर्थनिर्धारणम्।
- पदकोशनिवेशनम्।

३. **सन्धिच्छेदं कृत्वा कोशे निवेशयतु।**

श्रद्धेयाः अंशाः।

- सन्धियुक्तपदचयनम्।
- सन्धिविश्लेषणम्।
- संश्लिष्टपंदकोशेनिवेशनम्।



# ४.२

# प्रथम समागमः।





## प्रवेशकः

साधारणजनानामपि कादम्बरीपठनाय योग्यया रीत्या ललितया भाषया च पण्डितवर्येण अनन्ताचार्येण पुनराख्यानं कृत्वा चन्द्रापीडचरितम् इति नाम्ना समाकलितम्। नायिका महाश्वेता एकदा अम्बया समं अच्छोदं सरः स्नातुमागता।

### पाठभागः

**अथैकदा मधुमासदिवसेषु अम्बया सममिदमच्छोदं सरः स्नातुमभ्यागमम्। तत्तन्मनोहरोद्देशदर्शनलोभाक्षिप्तहृदया तत्र तत्र सखीजनेन सह व्यचरम्। एकस्मिन् प्रदेशे झटिति वनानिलेनोपनीतम् अभिभूतान्यपरिमलम् अनाघ्रातपूर्वं कुसुमगन्धमभ्यजिघ्रम्। 'कुतोऽयम्' इत्युपारूढकुतूहला कतिचित्पदानि**

**गत्वा अयुग्मलोचनं वशीकर्तुकामं काममिव सनियमम् अतिमनोहरं सवयसा सह स्नानार्थमागतं मुनिकुमारकमपश्यम्। तेन च कर्णावतंसीकृतां कुसुममञ्जरीमभिवीक्ष्य अस्या नन्वयं परिमलः इति मनसा निश्चित्य तं तपोधनयुवानम् ईक्षमाणाहं नवयौवनसुलभेन कुसुमायुधेन परवशीकृता अभवम्।**

---

अथैकदा- अथ + एकदा, अनन्तरं - कस्मिंश्चित् दिने। मधुमासदिवसेषु- मधुमासस्य दिवसेषु- वसन्तकालदिनेषु इत्यर्थः। अम्बया समं- मात्रा सह। अत्र समं इति अव्ययस्य योगे "सहयुक्तेऽप्रधाने" इति सूत्रेण अम्बया इति तृतीया विभक्तिः। इदमच्छोदं सरः- इमम् अच्छोदनामकं सरः। स्नातुम् अभ्यागमम्- अभि +आगमम् गम्लृधातोः लङि म.पु. ए.व. रूपम्। अत्र स्नातुम् इति तुमुन्नन्तमव्ययम्। स्नानं कर्तुम् आगच्छम् इत्यर्थः। तत्तन्मनोहरोद्देशदर्शनलोभाक्षिप्तहृदया- तत्र तत्र मनोहरान् शोभायुक्तान् दर्शनयोग्यान् प्रदेशान् द्रष्टुं लोभेन आक्षिप्तहृदया हृदयेन आकृष्टा भूत्वा तत्र तत्र सखीजनेन सह सखीभिः साकं व्यचरम्- वि +आ चर् धातोः लङि उ.पु. ए.व. रूपम्। इतस्ततः अचरम् इत्यर्थः। एकस्मिन् प्रदेशे कस्मिंश्चित् प्रदेशे। झटिति- शीघ्रं, वनानिलेनोपनीतं- वनानिलेन उपनीतं कानने मारुतेन आनीतम्। अभिभूतान्यपरिमलम् अतिक्रान्तेतरसौरभ्यं, अनाघ्रातपूर्वं - इतः पर्यन्तं नानुभूतं नूतनं ।अनाघ्रातपूर्वं- न आघ्रातपूर्वम्। कुसुमगन्धम्- पुष्पगन्धम्। अभ्यजिघ्रम्- गन्धं आस्वादयम्- अभि घ्रा घ्राणने पर-लङ्-उ.पु.ए.व.। कुतोऽयं- कुतः+ अयम्। इत्युपारूढकुतूहला- इति +उपारूढकुतूहला कौतुकचित्ता भूत्वा कतिचित् पदानि -कतिचित् दूरं गत्वा, अयुग्मलोचनं - अयुग्मं लोचनं यस्य सः शिवः। तं शिवम् इत्यर्थः। वशीकर्तुकामं वशे कर्तुं कामं यस्य सः वशीकर्तुकामः तम्। "तुम्काममनसोरपि" इति तुमुन्नन्तस्यानुस्वारस्य लोपः। काममिव- कामम् +इव कामदेवम् इव। सनियमं- सव्रतानुष्ठानम्। अतिमनोहरम्- अतिशोभायुक्तम्। सवयसा सह - सवयस्केन सह। स्नानार्थमागतं- स्नानार्थम्

**अथ अशेषजनपूजनीया चेयं जातिः इति कृत्वा सविभ्रममस्मै प्रणाममकरवम्। कृतप्रणामायां मयि, मद्विकारदर्शनापहृतधैर्यं तमपि कुमारं प्रदीपमिव पवनः तरलतामनयदनङ्गः। अथ मुहूर्तमिव स्थित्वा तं द्वितीयमस्य सहचरं मुनिबालकमुपसृत्य प्रणामपूर्वकमपृच्छम्- ' 'भगवन्!किमभिधानः? कस्य वाऽयं तपोधनयुवा? किंनाम्नस्तरोरियमनेनावतंसीकृता कुसुममञ्जरी?'' इति।।**

---

+आगतं । स्नानं कर्तुम् आगतम्। मुनिकुमारकम्- महर्षिकुमारकम् अपश्यम्- दृशिर् प्रेक्षणे धातोः लङि पर. उ. पु. ए.व.। दृष्टवती इत्यर्थः। तेन च तेन पुण्डरीकेण। कर्णावतंसीकृतां श्रवणपुटे न्यस्तां, कुसुममञ्जरीं- पुष्पमञ्जरीम्। अभिवीक्ष्य-दृष्ट्वा, अस्या कुसुममञ्जर्याः अयं सुगन्धः इति मनसा निश्चित्य चित्तेन विचिन्त्य इत्यर्थः। निश्चित्य इति ल्यबन्तरूपम्। तं तपोधनयुवानां तं तापसकुमारम्, ईक्षमाणाहं- ईक्षमाणा + अहं- वीक्षमाणा अहं, नवयौवनसुलभेन- नवयौवनावस्थायां सुलभेन। सुखेन लब्धुं योग्यं सुलभं , तेन सुलभेन, कुसुमायुधेन- कामदेवेन। परवशीकृता - वशगता। अभवम्- भूधातोः पर. लङ् उ.पु. ए.व.।

अथ- अनन्तरम्। अशेषजनपूजनीया चेयं जातिः सर्वजनैः पूजनीया- पूजयितुं योग्या इयं जातिः इति। चेयं च +इयम्। कृत्वा- क्त्वान्तमव्ययम्, मत्वा। सविभ्रमं- भ्रमेण सह वर्तते इति सविभ्रमम् इत्यर्थः। प्रणाममकरवम्- प्रणामम् +अकरवम्। प्रणामं अर्पितवती इत्यर्थः। कृतप्रणामायां मयि- सति सप्तमीप्रयोगः। यदा अहं प्रणामं अकरवम् तदा इत्यर्थः। 'यस्य च भावेन भावलक्षणम्' इति सूत्रम्। अकरवम् - डुकृञ् करणे धातोः पर.पदी. लङि प्र.पु. एकवचनम्। मद्विकारदर्शनापहृतधैर्यं- मम विकारदर्शनेन विनिष्टधैर्यं । तमपि- तम् +अपि। कुमारं मुनिकुमारं, प्रदीपमिव प्रदीपम् +इव, प्रकर्षेण दीपयति इति प्रदीपः तं प्रदीपम्। पवनः वायुः। ज्वलन्तं प्रदीपं वायुः यथा प्रेरयति तथा तरलतां अनयदनङ्गः। तरलताम्-चञ्चलतां, अनयत् - णीञ्

**सः तु मामीषद्विहस्याब्रवीत्- बाले! किमनेन पृष्टेन प्रयोजनम्? अथ यदि कौतुकम् आवेदयामि, श्रूयताम्-**

**अस्ति सकलभुवनप्रख्यातकीर्तिः रूपातिशयितनलकूबरः श्वेतकेतुर्नाम दिव्यलोकनिवासी महामुनिः। तं च कदाचित् देवतार्चनकमलान्युद्धर्तुं मन्दाकिनीमवतरन्तं पुण्डरीकोपविष्टा देवी लक्ष्मीः ददर्श।**

---

प्रापणे- पर. पदी. लङ् प्र.पु. ए.व.। न अङ्गः यस्य सः अनङ्गः, कामदेवः। अथ अनन्तरं, मुहूर्तमिव मुहूर्तम् +इव क्षणमिव स्थित्वा तं द्वितीयम् +अस्य, सहचरं वयस्यं, सह चर्तुं शीलं यस्य सः सहचरः, तं सहचरं, मुनिबालकमुपसृत्य- मुनिबालकम् +उपसृत्य मुनिकुमारकम् उपगम्य उपसृत्य इति ल्यबन्तम्। प्रणामपूर्वकमपृच्छम्- प्रणामपूर्वकम् +अपृच्छम्। नत्वा अपृच्छम्। अपृच्छम्- प्रच्छ विप्सायां धातोः लङि उ.पु, ए.व रूपम्। भगवन्! किमभिघानः- किम् +अभिधानः। अभिघानः- नामधेयं किम्? कस्य वा अयं तपोधनयुवा? इति- अयं तपोधनयुवा कस्य पुत्रः? इति।

किंन्नाम्नः- किन्नामधेयमस्य। तरोरियम्- तरोः +इयम् तरोः वृक्षस्य । अवतंसीकृता कर्णे आभरणरूपेण धृता इयं कुसुममञ्जरी गुच्छे कुसुम इति इयं कुसुममञ्जरी कस्मिन् वृक्षे जाता इति।

सः - द्वितीयः मुनिकुमारः (कपिञ्जलः) तु मामीषद्विहस्याब्रवीत्- माम् + ईषत् + विहस्य +अब्रवीत्। मां- महाश्वेतां ईषत्- किञ्चित् विहस्य हासं कृत्वा, अब्रवीत्- अकथयत्। ब्रूञ् व्यक्तायां वाचि लङ् पर. पदी. प्र.पु.ए.व.। विहस्य ल्यबन्तमव्ययम्। बाले! वत्से! किमनेन - किम् + अनेन, किम् एतेन पृष्टेन- प्रदत्तप्रश्नेन प्रयोजनं किम् उपयोगः कः? अथ- यदि कौतुकं- आकाङ्क्षा चेत्, आवेदयामि कथयामि। आवेदयामि- आङ्+ विद्लृ णिचि लट् पर. पदी. उ.पु.ए.व.- कथयामि। श्रूयताम् - आकर्ण्यताम्। श्रु- श्रवणे कर्मणि

**तद्रूपमवलोकयन्त्यास्तस्याः मन्मथविकृतं मन आसीत्। सद्य एव तया मानसः कुमारः उदपादि। ततस्तमादाय सा - "भगवन्! गृहाण तवायमात्मजः" इत्युक्त्वा श्वेतकेतवे ददौ। असावपि तस्य बालजनोचिताः सर्वाः क्रियाः कृत्वा तस्य पुण्डरीकसंभवतया तदेव पुण्डरीक इति नाम चक्रे।**

**ततः क्रमेण तम् आगृहीतसकलविद्याकलापम् अकार्षीत्। सोऽयं**

---

आत्म पदी लोट् प्र.पु.ए.व.।

अस्ति- अस भुवि पर लट् पर.पदी. प्र.पु ए.व. सकलभुवनप्रख्यातकीर्तिः- सर्वलोकप्रशस्तः। रूपातिशयितनलकूबरः- सौन्दर्येण नलं कूबरं च जितवान्, दिव्यलोकनिवासी- स्वर्गलोकवासी, महामुनिः- महान् च असौ मुनिः च, महर्षिः इत्यर्थः। श्वेतकेतुर्नाम श्वेतकेतुः + नाम। अस्ति वर्तते। कदाचित् एकस्मिन् दिने । देवतार्चनकमलान्युद्धर्तुं- देवपूजायै आवश्यकानि पङ्कजानि सम्पादयितुं देवतार्चनकमलानि +उद्धर्तुम्। उद्धर्तुम् इति तुमुन्नन्तमव्ययम्। मन्दाकिनीमवतरन्तम्- मन्दाकिनीम् +अवतरन्तम् आगतवन्तं तं श्वेतकेतुं पुण्डरीकोपविष्टा- पुण्डरीके उपविष्टा कमले स्थिता लक्ष्मीः लक्ष्मीदेवी, ददर्श अपश्यत्। ददर्श- दृशिर् प्रेक्षणे धातोः पर.पदी. लिट् प्र.पु.ए.व. इत्यर्थः। तद्रूपमवलोकयन्त्याः - तत् + रूपम्+ अवलोकयन्त्याः विलोकयन्त्याः, तस्याः- लक्ष्मीदेव्याः मनः- चित्तं, मन्मथविकृतं मन्मथेन विकृतम् आसीत्। मन्यथः- कामदेवः। कामपरवशा बभूव इत्याशयः। सद्य एव झटिति एव। तया- लक्ष्म्या, मानसः कुमारः- मानसपुत्रः, उदपादि उत्पादितः। सा मानसपुत्रं उत्पादयामास। उदपादि- उद् उपसर्गपूर्वक पद्ल् गतौ- लुङ् परस्मैपदी प्र.पु एकवचनम्।

ततस्तमादाय- ततः +तम् +आदाय। आदाय ल्यबन्तमव्ययम्। अनन्तरं तं शिशुं आदाय- गृहीत्वा, सा- लक्ष्मीदेवी भगवन्!- हे भगवन्! श्वेतकेतो! गृहाण- स्वीकरोतु! गृहाण- ग्रह उपादाने लोट् पर. पदी. म.पु. एकवचनम्। तवायमात्मजः- तव +अयम् +आत्मजः। अयं भवदीयः पुत्रः इत्यर्थः। इत्युक्त्वा- इति + उक्त्वा -एवं ज्ञापयित्वा। श्वेतकेतवे श्वेतकेतुनामकाय

**संप्रति चतुर्दशीति भगवन्तं भवानीपतिमुपासितुमागतः। इयं च पारिजातकुसुममञ्जरी रूपातिशयबद्धादरया मार्गसङ्गतया नन्दनवनदेवतया समर्पिता अनिच्छतोऽप्यस्य मया कर्णपूरीकृता इति।**

---

महर्षिणे ददौ-अदात्। ददौ -डुदाञ् दाने पर.पदी. लिट्- प्र.पु ए.व.।श्वेतकेतवे ददौ इत्यत्र दानार्थकस्य धातोः योगे चतुर्थी। असौ +अपि- आसावपि। सः - महर्षिः, तस्य बालस्य, बालजनोचिताः- शिशुजनोचिताः, सर्वाः क्रियाः- सर्वाः प्रवृत्तयः कृत्वा तस्य बालस्य, पुण्डरीकसंभवतया पुण्डरीके जात इत्यतः। तदेव तत् +एव पुण्डरीक इति नाम चक्रे- नाम ददौ इत्यर्थः। चक्रे- डुकृञ् करणे आ.पदी. लिट् प्र.पु. एकवचनम्।

ततः- अनन्तरं, क्रमेण- (सःश्वेतकेतुः) कालक्रमेण, पुण्डरीकं- आगृहीतसकलविद्याकलापं- सकलानां विद्यानां कलापः (समूहः) सकलविद्याकलापः, आगृहीतः सकलविद्याकलापः येन सः तं- अगृहीतसकलविद्याकलापम्। अकार्षीत्- डुकृञ् करणे परस्मैपदी लुङ् प्र.पु एकवचनम्। सर्वाः विद्याः तम् अपाठयत्। सोऽयम्- सः +अयम्। अयं पुण्डरीकः, सम्प्रति- अधुना, चतुर्दशीति- चतुर्दशी +इति। भगवन्तं भवानीपतिं - परमेश्वरम्। भवान्याः पतिः- भवानीपतिः, तम् भवानीपतिम्। उपासितुं पूजयितुं तुमुन्नन्तमव्ययम्। आगतः प्राप्तः। इयं पारिजातकुसुममञ्जरी रूपातिशयबद्धादरया- रूपसौकुमार्ये जातादरया, मार्गसंगतया- मार्गमध्ये आगतया, नन्दनवनदेवतया- नन्दनवनस्य देवतया, समर्पिता सम्यक् अर्पिता। अनिच्छतोऽप्यस्य अनिच्छतः तस्य। अनिच्छतः- अनभिलाषमाणस्य अपि तस्य पुण्डरीकस्य, मया कपिञ्जलेन, कर्णपूरीकृता कर्णे न्यासीकृता, पुण्डरीकस्य कर्णाभरणत्वेन निक्षिप्ता।

इति +उक्तवति- इत्युक्तवति, तस्मिन्, सति सप्तमीप्रयोगः। यदा सः इति उक्तवान् तदा इत्यर्थः। तपोधनयुवा तपः एव धनं यस्य सः तपोधनः तपोधनो असौ युवा च तपोधनयुवा। कुतूहलिनि कुतूहलं यस्यां अस्ति सा

**इत्युक्तवति तस्मिन् स तपोधनयुवा "अयि कुतूहलिनि! किमनेन प्रश्नायासेन? यदि रुचिरपरिमला, गृह्यतामियम्" इत्युक्त्वा समुपसृत्य आत्मीयात् श्रवणात् अपनीय मदीये श्रवणपुटे ताम् अकरोत्। तत्क्षणं लज्जया सह तत्करतलात् गलितां तेन अज्ञाताम् अप्राप्तामेव भूतलम् अक्षमालां गृहीत्वा सलीलं कण्ठाभरणताम् अनयम्।**

---

कुतूहलिनी, तत्सम्बोधने कुतूहलिनि। किमनेन किम्+अनेन। प्रश्नायासेन प्रश्नकरणेन आयासेन? किमपि प्रयोजनम् नास्ति इत्यर्थः। यदि रुचिरपरिमला कुसुममञ्जरी इष्टसौरभ्या चेत् गृह्यतामियम् गृह्यताम् इयं गृह्यतां ग्रह उपादाने आत्म. पदी कर्मणि लोट् प्र.पु एकवचनम्। इत्युक्त्वा- इति+उक्त्वा समुपसृत्य ल्यबन्तमव्ययम् समीपम् आगत्य इत्यर्थः। आत्मीयात् श्रवणात् स्वकर्णात्। अपनीय-ल्यबन्तमव्ययम् गृहीत्वा इत्यर्थः। मदीये श्रवणपुटे-मम (महेश्वेतायाः) श्रवणपुटे। मम इदं- मदीयं, तस्मिन् मदीये, तम् अकरोत् -तामक्षमालां निक्षिप्तवान् । तत्क्षणं- तस्मिन् समये। लज्जया सह- त्रपया सह। तत्करतलात् गलितां- तस्य करात् भ्रष्टां, तेन अज्ञातां- तेन न ज्ञाताम्। अप्राप्तामेव - अप्राप्ताम् +एव। भूतलं- भूमिम्, अप्राप्तां- अस्पृष्टां अक्षमालां-अक्षैः निर्मितां मालां गृहीत्वा, सलीलं- लीलया सह वर्तते यस्मिन् कर्मणि तद्यथा सलीलम्। कण्ठाभरणतां - कण्ठे आभरणरूपेण कृत्वा अनयम्। अनयम्- णीञ् प्रापणे पर.पदी. लङ् उ.पु. एकवचने रूपम्।



## पठनप्रवर्तनानि

१. पाठभागात् नूतनपदानि चित्वा शब्दकोशे योजयत।

२. संबोधनप्रथमारूपाणि निर्धार्य लिखत।

३. अव्ययपदानि चित्वा पट्टिकां कुरुत।

४. क्रियापदानि चित्वा पट्टिकां कुरुत।

# ४.३

# काव्यतत्वचिन्ता।



## प्रवेशकः

अलङ्कृतिरलङ्कारः। तदधिकृत्य रचितं शास्त्रम् अलङ्कारशास्त्रम्। तथा सैन्दर्यमलङ्कारः इत्यपि प्रसिद्धम्। संस्कृतवाङ्मये अलङ्कारशास्त्रम् सौन्दर्यशास्त्रमित्यभिधीयते। काव्यात्मनः अन्वेषणमेव अत्र प्रतिपाद्यते। अस्य शास्त्रस्य प्रवर्तकेषु भरतः, भामहः, उद्भटः, रुद्रटः, दण्डी, वामनः, आनन्दवर्धनः, कुन्तकः, अभिनवगुप्तः, मम्मटभट्टः, राजशेखरः ,क्षेमेन्द्रः जगन्नाथपण्डितः इत्यादयः आचार्याः प्रमुखाः। साहित्यतत्त्वचिन्ता अथवा काव्यात्मतत्वचिन्ता इति वा व्यवहृतायाम् अस्यां शास्त्रपद्धत्यां प्रसिद्धाः सप्तपद्धत्यः अङ्गीकृताः।

वेदोपनिषदादीनाम् आदिमसाहित्यरूपाणाम् उत्पत्तिकालात्परं निरूपकैः निरुक्ता एका पद्धतिः भवति शब्दार्थसाहित्यपद्धतिः इति सामान्येन वक्तुं शक्यते। यद्यपि पूर्विका तथापि तां पद्धतिं केचन नाङ्गीकुर्वन्ति।

### विविधालङ्कारिकाणां मतेषु काव्यलक्षणम्।

१. शब्दार्थौ सहितौ काव्यम्- भामहः।

२. शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली- दण्डी।

३. शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि बन्धे व्यवस्थितौ (काव्यं) कुन्तकः।

४. रमणीयार्थप्रतिपादकः शब्दः काव्यम्- जगन्नाथः।

५. तददोषौ शब्दार्थौ सगुणावनंलङ्कृती पुनः क्वपि-मम्मटः।

६. वाक्यं रसात्मकं काव्यम्- विश्वनाथः।

७. रीतिरात्मा काव्यस्य-वामनः।

८. काव्यस्यात्मा ध्वनिः- आनन्दवर्धनः।

### काव्यप्रयोजनम्।

१. काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।। (मम्मटः)

२. धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्।।( भामहः)

### काव्यलक्षणम्।

१. शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।। (मम्मटः)

२. नैसर्गिकी च प्रतिभा श्रुतं च बहुनिर्मलम्।
आनन्दश्चाभियोगोऽस्य कारणं काव्यसम्पदः।। (दण्डी)

## १. रसपद्धतिः।

भरतमुनिना नाट्यशास्त्रे आविष्कृता आनन्दवर्धन- अभिनवगुप्तप्रभृतिभिः पोषिता च भवति रसपद्धतिः। नाट्ये काव्ये च रसास्वाद एव सहृदायानां परमप्रयोजनमिति मुनिमतम्। "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति रससूत्रं भरतेन निरुक्तम्। श्रृङ्गारादि अष्टावेव रसाः नाट्ये इति भरतेन निर्दिष्टम्। काव्येषु शान्तरसमपि सर्वाङ्गीकृतम्।

पश्चात् आचार्येण विश्वनाथेन साहित्यदर्पणं नाम्नि ग्रन्थे "वाक्यं रसात्मकं काव्यम्" इति समर्थितम्। आचार्येण जगन्नाथपण्डितेनापि रसध्वनेः प्राधान्यं स्वग्रन्थे रसगङ्गाधरे निरूपितम्।

## २.अलङ्कारपद्धतिः।

भामहाचार्यस्य नाम्नि कीर्त्यते एषा पद्धतिः। आचार्यास्यास्य काव्यालङ्कारः इति ग्रन्थः अस्याः आधारः। भामह इव रुय्यकः रुद्रटादयश्च अस्याः वक्तारः आसन्। "काव्यं ग्राह्यमलङ्कारात्" इति प्रमाणवाक्येन अलङ्कारपद्धत्याः स्थापना तैः क्रियते। काव्यालङ्कारं नाम ग्रन्थं भामहालङ्कारम् इति नाम्ना अपि व्यवह्रियते।

"काव्यं ग्राह्यमलङ्कारात्"।

## ३. रीतिपद्धतिः।

वामनाचार्यस्य नाम्नि एषा पद्धतिः प्रसिद्धा अभवत्। आचार्यस्यास्य काव्यालङ्कारसूत्रवृत्तिः अस्याः आधारग्रन्थः। तस्मिन् "रीतिरात्मा काव्यस्य" इति प्रमाणवाक्येन रीतिपद्धत्याः स्थापना अनेन क्रियते। रीतयः प्राधान्येन त्रिधा विभज्यन्ते वैदर्भी, गौडीया, पाञ्चाली चेति।

रीतिरात्मा काव्यस्य। विशिष्टा पदरचना रीतिः। विशेषो गुणात्मा। एवं गुणात्मभूतविशिष्टपदरचना या रीतिः सा काव्यस्यात्मेति व्यवस्थितम्।

## ४. ध्वनिपद्धतिः।

आनन्दवर्धनो नाम आचार्यः अस्याः प्रवर्तकः। आचार्यस्यास्य “ध्वन्यालोकः” अस्याः पद्धत्याः आधारग्रन्थो भवति। “काव्यस्यात्मा ध्वनिः” इति प्रमाणवाक्येन आचार्योऽयं अस्याः स्थापनां करोति। आनन्दवर्धनमङ्गीकृत्य अभिनवगुप्त- मम्मट- जगन्नाथपण्डितः इत्यादयः एतामेव पद्धतीं समर्थयन्ति। उक्तञ्च ध्वन्यालोके-

काव्यस्यात्मा ध्वनिरिति बुधैर्यस्समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाचां स्थितमविषये तत्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्।।

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।
सरस्वतीस्वादु तदर्थवस्तुर्निष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्।। इत्यादि ।।

## ५. वक्रोक्तिपद्धतिः।

कुन्तको नाम आचार्यः अस्याः पद्धत्याः प्रवर्तकः। “वक्रोक्तिजीवितम्”नाम अस्याः आधारग्रन्थः। “वक्रोक्तिः काव्यजीवितम्” इति प्रमाणवाक्येन वक्रतायामेव काव्यशोभा इति तेन वक्रोक्तिपद्धतिः साधूक्रियते। केचन आचार्याः वक्रोक्तिः अलङ्कारे अन्तर्भवति इति अभिप्रयन्ति।

वक्रोक्तिः काव्यजीवितम्
शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।

## ६. औचित्यपद्धतिः।

क्षेमेन्द्रः अस्याः पद्धत्याः आचार्यः। “औचित्यविचारचर्चा” अस्याः आधारग्रन्थः। “प्रसिद्धौचित्यबन्धस्तु रससस्योपनिषद्परा” इति

प्रमाणवाक्येन पद्धतिरियं तेन समर्थ्यते। वर्ण-पद-वाक्य -अर्थ-रस-ध्वन्यादिषु सर्वकाव्यघटनाप्रकारेषु औचित्यदीक्षा पद्यादारभ्य महाप्रबन्धपर्यन्तं समग्रशोभाम् आवहति इति औचित्यस्य प्रसक्तिः।

अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्। तथा च
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषद्परा।।

एवं प्राधान्यतया षट् पद्धतयः वर्तन्ते। एताः अतिरिच्य गुणपद्धतिः चमत्कृतिपद्धतिः अनुमितिपद्धतिः इत्यादयः अलङ्कारपद्धतीषु कथ्यन्ते चेदपि एषाः प्रायः उपरिनिर्दिष्टासु पद्धतीषु एव अन्तर्भवन्तीत्यतः पृथक् न दीयते।



# अभ्यासः

१. राज्ञः रघोः उदारतां विचिन्त्य उत्तमनृपाणां गुणान् वर्गीकुरुत।

२. कौत्सस्य गुरुभक्तिः इति विषये एकां खण्डिकां लिखत।

३. शिष्यं प्रति गुरोः वरतन्तोः विश्वासः इति विषयं मनसि निधाय गुरुशिष्यबन्धमिति विषये एकां संगोष्ठिं चालयत।

**प्रदत्तानां उत्तराणि लिखत।**

१. 'कौत्सः प्रपेदे वरतन्तुशिष्यः'। किमर्थम्?

२. प्रत्युज्जगाम अतिथिम् आतिथेयः। अतिथिः कः? आतिथेयः कः?

३. तमर्चयित्वा विधिवद्विधिज्ञः/ कम् अर्चयित्वा? विधिज्ञः कः?

४. कुशाग्रबुद्धे कुशली गुरुस्ते। अत्र कुशाग्रबुद्धिः कः? गुरुः कः?

५. अप्याज्ञया शासितुरात्मना वा। अत्र शासिता कः?

६. तमित्यवोचद्वरतन्तुशिष्यः- कम् इति अवोचत्? वरतन्तुशिष्यः कः?

७. समाप्तविद्येन मया महर्षिः। अत्र महर्षिः कः?

८. अचिन्तयित्वा गुरुणाहमुक्तः। केन गुरुणा उक्तः? अहं कः?

९. जगाद भूयो जगदेकनाथः । किं जगाद? जगदेकनाथः कः?

१०. रघोः सकाशादनवाप्य कामम्। कामं किम्?

११. तं भूपतिर्भासुरहेमराशिम्- कम्?

१२. नृपोऽर्थिकामादधिकप्रदश्च- नृपः कः?

**लिखितानां पदानां समानाशययुक्तानि पदानि श्लोकेभ्यः चित्वा लिखत।**

| | | |
|---|---|---|
| १. यागः | २. राजानम् | ३. भाजने |
| ४. प्राप | ५. अध्यापकः | ६. सूर्यस्य |
| ७. चित्तम् | ८. गुरोः | ९. काननात् |
| १०. वाणीं | ११. निराशः | १२. ज्ञापितः |
| १३. चिरकालं | १४. दारिद्र्यम् | १५. धनस्य |
| १६. ब्राह्मणेन | १७. समीपात् | १८. ब्राह्मणः |
| १९. धनम् | २०. भूमिम् | २१. प्रभाते |
| २२. आकाशात् | २३. राजा | २४. चरणम् |
| २५. पूर्णतया | २६. याचकः | |
| २७.अयोध्यावासिनः | | |

**कोष्ठकात् समुचितम् उत्तरं निधार्य लिखत।**

१. वरतन्तुशिष्यः कः? (कौत्सः, रघुः, रामः)

२. अनर्घशीलः इति विशेषणपदस्य अर्थः कः?
(अमूल्यस्वभावः, साधारणस्वभावः, दुष्टस्वभावः)

३. विशां पतिः इत्यस्य पदस्य अर्थः कः?
(नृपः, प्रजाः, मनुष्यः)

४. उष्णरश्मेः चैतन्यमिव । अत्र उष्णरश्मिः इति शब्दः कं सूचयति?
( सूर्यं, चन्द्रं, शनिं)

५. रघोरुदारामपि गां निशम्य। अत्र गां इति पदस्य अर्थः कः?
(वाणीं, भूमिं, स्वर्गं)

६. अर्थकार्श्यम् इति पदस्य अर्थः कः?
(दारिद्र्यम्, संपत्, मूढता)

७. कोटीश्चतस्रो दश इत्युक्तौ कियन्मात्रमस्ति?
(चतुर्दशकोटीः, दशकोटीः, चतस्रकोटीः)

८. कोषगृहस्य मध्ये नभस्तः किं जातम्?
(हिण्मयी वृष्टिः, रजतमयी वृष्टिः, पुष्पवृष्टिः)

९. रघुः कस्मात् हेमराशिं प्राप्तवान्?
(कुबेरात्, वामनात्, इन्द्रात्)

१०. साकेतनिवासिनः के?
(अयोध्यावासिनः, मिथिलावासिनः, उज्जयिनीवासिनः)

**अधोदत्तेषु क्रियापदेषु लिट्लङ्लकाररूपाणि चित्वा पट्टिकां कुरुत।**

प्रपेदे, प्रत्युज्जगाम, उवाच, असि, अवोचत्, अगणयत्, आहर, जगाद, भूत्, चकमे, शशंसुः, दिदेश, अभूताम्।

**अधोदत्तानि वाक्यानि कः कं प्रति वदतीति लिखत।**

१. ऋषीणाम् अग्रणीः ते गुरुः कुशली अपि।

२. अर्हतः तव अभिगमने मे मनः न तृप्तम्।

३. समाप्तविद्येन मया महर्षिः गुरुदक्षिणायै विज्ञापितश्च।

४. स चिराय मे भक्तिम् एव पुरस्तात् अगणयत्।

५. वित्तस्य चतस्रः दश च कोटीः आहर।

अधोदत्तेषु पदेषु क्त्वान्तल्यबन्ततुमुन्नन्तरूपाणि चित्वा पट्टिकां कुरुत।

निधाय, अर्चयित्वा, आप्तम्, संभावयितुम्, निशम्य, अचिन्तयित्वा, अनवाप्य, अवेक्ष्य, निष्क्रष्टुम्।

यथोचितं योजयत

| क | ख |
|---|---|
| १. वरतन्तुः | राजा |
| २. रघुः | महाकविः |
| ३. कौत्सः | गुरुः |

४. कुबेरः — शिष्यः
५. कालिदासः — धनेश्वरः

**अधोदत्तानां श्लोकानां गद्यक्रमं पूरयत।**

१. तमध्वरे विश्वजिति क्षितीशं
निश्शेषविश्राणितकोषजातम्।
उपात्तविद्यो गुरुदक्षिणार्थी
कौत्सः प्रपेदे वरतन्तुशिष्यः।।

विश्वजिति............ निश्शेषविश्राजितकोषजातं.......... उपात्तविद्यः वरतन्तुशिष्यः......... गुरुदक्षिणार्थी तं.............।

२. स मृन्मये वीतहिरण्मयत्वात्
पात्रे विधायार्घ्यमनर्घशीलः
श्रुतप्रकाशं यशसा प्रकाशः
प्रत्युज्जगामातिथिमातिथेयः।।

अनर्घशीलः यशसा प्रकाशः.............. सः वीतहिरण्मयत्वात्........... पात्रे अर्घ्यं —.......... प्रकाशं अतिथिं............।

३. तमर्चयित्वा विधिवद्विधिज्ञः
तपोधनं मानधनाग्रयायी।
विशांपतिर्विष्टरभाजमारात्
कृताञ्जलिः कृत्यविदित्युवाच।।

विधिज्ञः मानधनाग्रयायी कृत्यवित्.................. विष्टरभाजं तं............. विधिवत्......... आरात् कृताञ्जलिः इति........... ।

४. जनस्य साकेतनिवासिनस्तौ
द्वावप्यभूतामभिनन्द्यसत्वौ।

गुरुप्रदेयाधिकनिःस्पृहार्थी
नृपोऽर्थिकामादधिकप्रदश्च।।

गुरुप्रदेयाधिकनिस्पृहः............. अर्थिकामात्............. तौ द्वौ अपि साकेतनिवासिनः.......... अभिनन्द्यसत्वौ...........।

कौत्सरघुसंवादं संभाषणरूपेण परिवर्तयत।

ICT

१. कालिदासस्य इतिहासकृतीः च अधिकृत्य power point
२. सन्धियुक्तपदानां विश्लिष्टपदानां च slide show
३. श्लोकानां सस्वरालापनस्य सान्द्रमुद्रिका।

सौन्दर्यशास्त्रानुसारं अधो दत्तानि पदानि विशदयत।

१. अलङ्कारः
२. अर्थः
३. शब्दः
४. उपमा
५. विनोक्तिः
६. रसः
७. रीतिः
८. उत्प्रेक्षा
९. वक्रोक्तिः
१०. औचित्यम्

## यथोचितं योजयत।

| क | ख |
|---|---|
| १. रसपद्धतिः | कुन्तकः |
| २. रीतिपद्धतिः | क्षेमेन्द्रः |
| ३. ध्वनिपद्धतिः | भरतः |
| ४. वक्रोक्तिपद्धतिः | आनन्दवर्धनः |
| ५. औचित्यपद्धतिः | वामनः |

## यथोचितं योजयत

| क | ख |
|---|---|
| १. काव्यं ग्राह्यमलंकारात् | ध्वनिपद्धतिः |
| २. विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः | अलङ्कारपद्धतिः |
| ३. रीतिरात्मा काव्यस्य | औचित्यपद्धतिः |
| ४. काव्यस्यात्मा ध्वनिः | रसपद्धतिः |
| ५. अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम् | रीतिपद्धतिः |

## ICT

१. विभिन्नानां अलङ्कारशास्त्रकाराणां तेषां पद्धतीनां च power point

२. काव्यलक्षणानां, काव्यप्रयोजनानां काव्यकारणानाञ्च Slide show

# अधिकविस्तरः।

**सत्याग्रहः**

यदा महात्मागान्धी आफ्रिक्कायाम् आसीत्, तदा ट्रान्स्वाल् (Transval) सर्वकारेण असाधारण- औद्योगिक- विज्ञापनेन एकः अध्यादेशः प्रसिद्धीकृतः। तदनुसारेण अष्टाधिकवयस्काः भारतीयाः स्त्रीपुरुषाः भारवाहाः (coolie) इति एष्याटिक्- पञ्चीकरणालयतः (Registrar of Asiatics) पञ्चीकरणम् अवश्यं करणीयम् इति। यस्य हस्ते पञ्चीकृतमुद्रा नास्ति तस्य अपराधित्वेन कारागृहवासः तथा स्वदेशं प्रति प्रस्थानं च निर्बन्धितम्।

गान्धिना एतत् भारतीयानां कृते अत्याचारम् इति ज्ञात्वा तत् अध्यादेशः गुजरातीभाषायां अनूदितः। स अग्रेसराणां भारतीयानां सभायाम् अवस्थामिमां समर्थयित्वा, अङ्गीकारपूर्वकम् आन्दोलनाय सज्जीकरणानि घटयामास। गान्धिजिना प्रथमं आन्दोलनोऽयं "उदासीनप्रतिकृतिः"(passive resistence) इति संज्ञया व्यवहृतः। परं आङ्गलभाषां नाम्नः आन्दोलनस्य यथार्थाशयस्य स्पष्टीकरणं न भवेदिति मत्वा भारतीयाशयादर्शव्यक्ततायै समर्थनाय च अभिमतानि अर्थितानि समर्पयितानि च। लब्धासु संज्ञासु मगन्लाल्गान्धी नामकेन सदाग्रह इति यत् सूचितं तद् प्रथमं स्वीकृतम्। अर्थात् सदर्थेषु दृढता इति। महात्मागान्धिना पुनः तन्नाम परिवर्तितम्। सत्याग्रहः इति सत्ये निष्ठा इति। सप्तवर्षत्यान्दोलनात्परं सर्वकारः गान्धिना साकं समयसमर्थनाय प्रेरितः। तथा सत्याग्रहः नूतन -अहिंसात्मकायुधत्वेन परिणतिं प्राप।